CC0. In Public Domain, Digitizagtion by eGangotri

Jagaddhara
Folios - 73

INDIRA GANDHI NATIONAL CENTRE FOR THE ARTS

RECORD NO. 11	LANGUAGE Skt.
ROLL NO. 3 Date of Filming 16-5-96	
ACC NO.	SCRIPT Dev Nagari
Ms. No. 3996	
Bundle No.	
DEC NO. /R. NO	MATERIAL Paper
DESCRITIVE CATALOGUE/TRIENNIAL CATALOGUE VOLUME : An Index to the Register of Mss. in the Pothikhana of Jaipur.	
AUTHOR Jayadeva. Com. - Jagaddhara	NO OF FOLIOS PAGES 73 Folio no. 1 To 6, 17 - Missing
TITLE Gītagovindaṭīkā	COMPLETE/INCOMPLETE
WITH OR WITHOUT COMMENTARY	REMARKS
SUBJECT Kāvya	LOCATION The Maharaja Sawai Man Singh II Museum, Khasmohor Collection, JAIPUR.

Bran

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

हे ॥४॥ मधुमुरनरकध्वंसे दैत्यानां ॥ विनाशकघातक ॥ गरुडासन ॥ गरुडः पक्षिराजः स एवासनमुपवेशस्थानं य
स्य सः ॥ सुरकुलानां केलेः क्रीडायाः निदान आदिकारण ॥ निदानं त्वादिकारणमित्यमरः ॥ छ ॥ अमलकमलदललोचनभवमो
चन ए । त्रिभुवनभुवननिधान जय जयदेव हरे ॥५॥ अमलकमलदलवन्निर्मलपद्मपत्र इव लोचने यस्य स भवजन्मनः ॥
मोचनं खंडकः प्राणेच त्रीणि भुवनानि चेति ॥ त्रिभुवनं तद्भुवनं इव सृष्टं यत्र निधानं निधिरिव ॥ आनंदजनकत्वात् पत्रं पलाशं छदनं
दलं पर्णं छदः पुमान् इत्यमरः ॥ निधानं चालये निधौ इति विश्वः ॥ छ ॥ जनकसुताकृतभूषण जितदूषण समरशमितदशकंठ
जय २ देव हरे ॥६॥ जनकसुतायाः सीतायाः कृतभूषण विहितालंकार जितो दूषणो नाम राक्षसो येन ॥ यद्वा जितं दूषणं पापं येन जि
ध्यापः इत्यर्थः ॥ समरे संग्रामे शमितो दशकंठो रावणो येन ॥ छ ॥ अभिनवजलधरसुंदर धृतमंदर ए । श्रीमुखचंद्रचकोर ॥ जय २ देव
हरे ॥७॥ अभिनवजलधरवत् ॥ नीलमेघवत्सुंदरो मनोज्ञः धृतो मंदरो गिरिविशेषो येन । श्रियो लक्ष्म्या मुखमेव चंद्रः चंद्र इव तत्र चकोर
पक्षिविशिष्टः चकोरेण हिमकरं लालं पायते इति ॥ छ ॥ तव चरणे प्रणता वयमिति भावय ए । कुरु कुशलं प्रणतेषु । जय २ देव हरे ॥
एवं भूत हे हरे तव चरणे वयं प्रणताः अतीव नम्राः तान् भावय जानीहि प्रणतेषु ॥ माद्दशेषु कुशलं कल्याणं कुरु ॥ छ ॥ श्रीजयदेवक
वेरिदं कुरुते मुदं ए । मंगलमुज्ज्वलगीतं । जय जयदेव हरे ॥८॥ श्रीजयदेवकवेरिदं मंगलं सर्वेषां सर्वत्र हितकारि चास्तु ॥ मंगलं उ
ति विशेषो मुदं हर्षं कुरुते विस्तारयति । अर्थाद्गायतां श्रुण्वतां उदितं भगवतो तालानुगमनेन रम्यगीति गानं च खंडादिस्वरेण ॥
दोषाविः यस्य तथा ॥ अत्र कमलेत्यादौ निष्ठेनेति सूत्रेण क्रांतस्य पूर्वनिपातः कलितेत्यादौ बहुलत्वेक वचनियमः इति पूर्वनिपातः मधुम

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

x लक्ष्य x

७

रेतिपदे विलासनसमनस्कयोः स्थालयात दंतयोः संकारवतो रेणुपाया सो न सवतीति चित्रं ॥ छ ॥ अधुना वसंतवर्णनव्याजेन श्री
कृष्णक्रीडावक्तुकामः साधूरकविराशिषयति ॥ पद्मापयोधरतटीपरिरंभलग्नकास्मीरमुद्रितमुरो मधुसूदनस्य। व्यक्तानुरागमिवखेल
दनंगखेद। स्वेदांबुपूरमनुपूरयतु प्रियं वः ॥ १ ॥ मधुसूदनस्य उरो वक्षस्थलं कर्तृ वो युष्माकं प्रियमभीष्टं पूरयतु ॥ संपूर्णं करोतु कीदृ
शमुरः पद्मापयोधरतट्याः लक्ष्म्याः स्तनपरिसरस्य परिरंभणे गाढालिंगितेन लग्नेन यत् काश्मीरं कुंकुमं तेन मुद्रितं चिह्नितं भूमि
वदं मुखरेः उरोन च न्यस्य इति कृत्वा लक्ष्म्याश्च द्विरदइति भावः काश्मीरं कुंकुमं प्रोक्तं। घोटके करभूलयो इति विश्वः कीदृशं
व्यक्तानुरागमिव अंतरानुरागो बहिर्विंदित इव यत्रानुरागस्य कविसंप्रदाये लोहितत्वात्त्वा त्वा म्य खेलदनंगेति कुर्वन्ननंगः अनं
गः स्मरस्य खेदे हे नमस्तुराताया से न घर्मजल प्रवाहो यत्र तथा। पूरोजल प्रवाहे स्यात् प्राणसंस्तुद्धिवातयोः इति विश्वः ॥ छ ॥ श्री
ह्लविरहोक्के विताया राधायास्तमेवानुसरेत्यादिनाकाचिन्सखी कृष्णवार्तां कथयितुमाह ॥ ॥ छ ॥ वसंते वासंतीकुसुमसुकुमा
करैरवयवैभ्रमंतीं कांतारे बहुविहितकृष्णानुसरणां ॥ अमंदं कंदर्पज्वरजनितचिंताकुलतया वलद्बाधां राधां सरसमिदमूचे सहचरी
॥ १ ॥ काचित्सहचरी सखी राधामिदमग्रे वक्ष्यमाणमूचे ॥ वदतिस्म तत्र कृवती वत्र उद्धे कमेका इति कर्मेति यं रसं सं प्रविलासं
तु ग्रेमप्रचिरमंतीं गच्छंतीं बहुविधवारं वारं। विहितं सततकृतौ श्रीकृष्णानुसरणं संबंधययापा। अमंदमुकुटं यथा स्वतितथा
कामवालोक्यो यादितामनंताप्यो घूर्णयाश्चलंती कुद्धे तीबाधे षीडा यस्याः ता॥ वल्लन्नइति पाठे तत्र चलंती राधा शरीरे वाह

७

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तीमाधवी लुतेति॥ भ्रमरः॥ कोनास्ते तुभ्रमरमित्यस्य संबंधयोगेनकरनीति चरेष्टः टिप्पणी॥ पूर्वोक्तमर्थं गीतेनाह॥ ॥गीतस्यास्य वसंत
रागः॥ रूपकतालः॥ रामलेदेर्णे॥ टीरवडिर्वहोव्रयवद्धद्रुः पुष्पन्पिकहतलताकरेण॥ स्वमनुदावा भ्रमरंगमूर्त्तिर्मनोद्यनंग
स्यवसंतरागः॥१॥ विहरतिहरिरिहसरसवसंते॥ नृत्यतियुवतिजनेनसमंसखिविरहिजनस्यदुरंते॥१॥ हेसखिसरसवसंतेमनोहर
मधुसमयेहरिः कृष्णो विहरति। क्रीडति युवतिजनेनसमं नृत्यति। कीदृग्वसंते। विरहिजनस्य विमुक्तलोकस्य दुरंतेदुःकृए
निघोर्त्तदा। चकारोत्राध्याहार्य्यः सकलपुष्पादिसमैः स्वस्ववृत्तेतदुतिसरसः। युवतिजनेनेति जात्याएकवचनं। दुःखेनांतोयस्य
तदुक्तः॥ कीदृशेवसंते॥ छ॥ ललितलवंगलतापरिशीलनकोमलमलयसमीरे। मधुकरनिकरकरंबितकोकिलकूजितकुं
जकुटीरे॥२॥ ललितायामनोहरायलवंगलतायास्तवंगशाखायाः परिशीलनेनकोमलोमनोहरो मलयसमीरोमलयानिलोय
त्र। एतेनवातस्यसुगंधित्वशीतलत्वाल्पकत्वानिदर्शितानि लवंगलतापरिशीलयतित्वाल्पयति नद्यादिचलत्वःसताज्योतिस्म
स्मांवृंद शाखायोप्रिगुल्पितविम्बः॥ कोमलौमृदुसुंदरविति च॥ धूर्तिस्तुलवंगलताकांतामलयसमीरोनायकस्तयोरा
श्लेषः स्तनोत्कर्षस्योद्दीपनं॥ पुनःकीदृशेमधुकरनिकरेणभ्रमरवृंदेनकरंवितैर्मिश्रितैःकोकिलैः कूजितःकुंजएवकुटी
रोऽल्पकुटीयत्र। यद्वा कूजनं कूजः सिमितः प्राप्तः एवंभूतैः कुंजकुटीरेयत्रकुंसे [illegible] रकुटाच्छोरस्तिरश्रेत्ययः॥
अल्पाकुटीरः स्यात्कुटिरिशाश्वतः मिश्रितेपिकरंवितमितिच॥ पुनःकीदृ[illegible]शे॥ उन्मदमदनमनोरथप
थिकवधूजनजनितविलापे। अलिकुलसंकुलकुसुमसमूहनिराकुलवकुलकलापे॥३॥ उद्भूतोमद

Dr. Urmila Sharma Collection, Varanasi

गीतगो०३०

८

नम दृष्ट्वा हर्षकामो यत्र एवंभूते॥ मनोरथो यस्याः पथिकवधूजनकस्य तेन ऊनितम विलापो॥ ऊत्याद्वितदेवने विलापपरिदेव

नमित्यमरः। पुनः कीदृशे अलिकुले भ्रमरसंघैः संकुलो व्याप्तः कुसुमसमूहो यस्मिन् निम्नकुले अशोकवकुला

नां कलापः समूहो यत्र॥ यद्वा कीदृशे वकुलः। कलापो भूषणं यस्याः तथा चामरः कलापो भूषणे बर्हे तूणीरे संहतेपि च।

षडूदस्त्रमरस्तथः इति॥ ३॥ मृगमदसौरभरभसवशंवदनवदलमालतमाले। युवजनहृदयविदारणमनसिजनखरु

चिकिंशुकजाले॥ ४॥ पुनः कीदृशे। मृगमदः कस्तूरी तस्य सौरभे तस्य वशंवदाः सुरभितामोदस्या यत्र वादिनीनि बाह्येन

दलमालापत्रदेशिणी येषां ईदृशा स्तमालातरवो यत्र। नूतनपत्रस्तमालो मृगमदगंधमनुकरोतीति। मृगनाभिमे

मदोगंधश्चेषरमपीति हारावली वशंवदतीति प्रियंवदो वशंवदः। खश्इति खश् प्रत्ययः। स्वल्पं नाप यस्य यस्य मागमः। पु

नः कीदृशे युवानाश्च ते जनाश्चेति तेषां हृदयं तद्विदारयतीति विदारणः तादृशो यो मनसिजः कामस्तस्य नखस्य नख

स्येव शोभा तेषामेवंभूतानां किंशुकानां पलाशकुसुमानां जालः समूहो यत्र॥ यद्वा युवजनानां विशुक्ते तरुणानां हृदय

विदारणाय मनसिजस्य नखानां रुचिर्यस्य एवंभूतः पलाशजालो यत्र। पलाशकुसुमानां वक्रत्वात्। यद्वा ताहशीं किंशुक

किंशुक×२ का लौकलिका यत्र। जालं कोरके स्याद् गवाक्षे जालनाययोरपि। विश्वः। क्षीरकोजालकं क्लीबे कलिका कोरकः पुमानित्यमरः॥

५॥ पुनः कीदृशे। मदनमहीपतिकनकदण्डरुचिकेशरकुसुमविकासे। मिलितशिलीमुखपाटलिपटलकृतस्मरत

तूणविलासे॥ ५॥ पुनः मदनमहीपतेः कामनृपस्य कनकदण्डसुवर्णघटितदण्डपुलच्छत्रस्य रुचिरिव रुचि शोभा ८

CC0. In Public Domain, Digitizagtion by eGangotri

यस्य केशरकुसुमस्य नागकेशरकुसुममं तथा तस्य विकाशचातुर्य्यं यत्र ताः तथाके शरकुसुमैर्विकाशयतीति कर्म्मोपपद
तय: ।। कनककेहेमरटकं इत्यमरः केशरो वकुलो नागकेशरश्चकंधबालकं इतिधरणिः । पुनः मिलिता संगता शिलीमुखास्त्वमर
येषु तैः पटलैः पटलैः पाटलपुष्पसमूहैः कृतो विहितः स्मरतूणविलासः कामतूणीरचेष्टितं यत्र । तूणपक्षे शिलीमुखा बाणा
तथा चामरः ।। अलिबाणौ शिलीमुखौ इति ।। ७ ।। विगलित लज्जित जगदवलोकन तरुणकरुणकृतहासे विरहिनिकृन्त
नकुंतमुखाकृतिकेतकिदंतुरिताशे ।। ८ ।। पुनः विगलिता चासौ लज्जा चेति कर्म्मधारयः सा विद्यते अस्य तदस्य संजातं तार
कादिभ्य इतीतच्प्रत्ययः ।। यद्वा । लज्जितः सावेक्षः विगलितलज्जितस्य जगतो वलोकनेन तरुणकरुणकैः युवकरुणवृक्षैः
पुष्पविकाशच्छलेन कृतो हासो यत्र ।। हासस्य श्वेतत्वात् ।। तरुणकरुणपुष्पसाम्यं श्यामवर्णस्तु शृंगारः श्वेतो हास्य प्रकीर्तितः
इति सारस्वतः यद्वा नानादृष्ट्वा वल्योकनेन तरुणकरुणनिमधानं करुणकुसुमान्येव कृतो हासो येन तरुणकरुणः सा वस्थ धानं निर्दे
गतलज्जस्य कलज्जस्य वलोकनेन हि करुणयुक्त एव साधूनां हास्य स्वतारुण्याद्वेति करुणः युवसंवृक्षैः कृपायां करुण
स्यादिति विश्वः पुनः विरहिणां वियोगिनां निकृंतनाय छेदनाय कुंतमुखाकृतिः निरस्त्र विशेषमुखं सदृशैः केतकैः केत
कीपुष्पैः दंतुरिता व्याप्ता दिशो यत्र । यद्वा निकृंतयतीति निकृंतनः नन्द्यादिभ्यो ल्युः विरहिनिकृतश्चासौ कुंतमुखाकृतिश्चेति
कर्म्मधारयः तादृशाकेतकदलै ।। तदंतुरिता आशा यत्र ।। निकृंतनम् निस्त्र तुणगत्या । शार्वम्यिस्ः केतकआष्टोऽकाशातोपि

Dr. Urmila Sharma Collection, Varanasi

गी०टी०उ०

२

केतकाधानहेतो। रिति मेघसंदेशो पान्थामकठोरकेतककलिस्वासं दिग्धमनुजैर्धैस्वं तिमालतीमाधवे इ तंतचार्थ। केत
किरेणुरेतास्तेइति कश्चित्पादः॥ तत्केतकारम्भे शिखे त्रिमरुतेण मलूरजपुष्पं बहुलम्बं दुरन्तरम्भे गोदंड एव। अन्यस्मिन्न
पिमुख्ये दंडं एवं मुन्नतंदं तयोर्गिर्च त्वरवनीति ध्वनितः निम्नोन्नते तथावाप्ते। दंडरं कथ्यते बुधैः इति धरणिः अत्रापि हास्य
श्रास्य शाशा हृयोर्दन्तताल्व्य सकारयोरनुप्रासाच्छं त्य॥ छ॥ माधविकापरिमलललितेनवनमालिकेनजातिसुगंधो
मुनिमनसामपि मोहनिकारणीतरुणाकारणिबंधो॥ ७॥ पुनः कीदृशो। माधविकायाः वासंत्याः परिमलेनगंधे
न ललितो मनोज्ञो विकसितो। स्तवकीति ध्वनिः परिमलोगंधमात्रेऽपि विमर्देत्थेऽपि स्तो रं वेदुरितिधरणिः ललितं ललविलो
सद्भक्षपस्यः पुनः नवमालिका नेवारीतिप्रसिद्धा जातिः स्वनाम्नैव प्रसिद्धा ताभ्यां सुगंधौ शोभनसुगंधयुक्तोगंध
योद्गत्पत्तिसुरभिलसितेति समासांतः नवमालिकाशाखाकास्यकाणो कसूद्दलितेक स्वः यद्वा नवमालिकाकुसु
मकुसुमचयने। यद्वा नवमालिकायाः जातिर्जन्मतया शोभनो गंधो यस्य। जातिरितिजनीप्रादुर्भावे स्त्रियां क्तिन्। इदा
जनोर्जा इतिजादेशः केचित्तुयकारमनस्यैवपठंति तत्पक्षे नवमालिकयाहेतुभूतयासुगंधयुक्तः इतित्यर्थः सु
गंधएव। पुनः मुनिमनसामपि वशीकरणं सिद्धानि स्वभावत एव मोहयति बच्चडा नवनाम समनोसियोवसंतो मोहय
तीति माहात्म्यं दर्शितमपि शाष्टेन तरुणानां प्रकारणबंधौ। स्वहेतबंधौ॥ कुत्रविरहतीति स्थानमाह॥ बालुकर्द ७

CC0. In Public Domain, Digitizagtion by eGangotri

तिमुक्तलतापरिरंभणपुलकितमुकुलितचूते। वृंदावनविपिने परिसरपरिगतयमुनाजलपूते॥८॥ वृंदावनविपिने वृंदावननाम्नि
वने हरिर्विहरतीति अन्वयः॥ स्फुरंत्यां शोभमानायां चलंत्यां वा अतिमुक्तलतायां वासंतीलतायाः परिरंभणेन आलिंगितेन मुकु
लितः पुष्पितः पुलकितो हृष्टश्चूतो यत्र। यद्वा मुकुलमेव मुकुलितं सात्विकः। तत्पुलकितरोमांचित स विद्यते यस्मात् द
स्यजाते तारकादिभ्य इतच्॥ एवंभूतश्चूतो यत्र॥ एतेनातिमुक्तलता नायिकायं दृष्ट्वा स्य नायकत्वं आलिंगनरोमांचस्वेद
कामविकारः सूचितः तथाहि। कंपस्वेदोथरोमांचः पृथिमा वल्गुलस्खले। आविर्भवति नारीणां अनुरागवशात्मनां इति स
स्तः विपिनं काननमित्यमरः॥ कीदृशे वने। परिसरपर्यंतं तत्र परिगते सर्वतोभावेन गतेन यमुनाजलेन पूते पवित्रे एतेन
स्थानस्य क्रीडायोग्यता दर्शिता॥८॥ श्रीजयदेवकवेरिदं भणितमुदयति हरिचरणस्मृतिसारं॥ सरसवसंतस
मयवनवर्णनमनुगतमदनविकारं॥९॥ श्रीजयदेवकवेरिदं भणितं कर्तृ उदयति उदितं भवति। कीदृशं भणितं हरिचरण
स्मृतिसारं॥ हरिचरणस्य स्मृतिरेव स्मरणमेव सारो यत्र। सारो धनं न्याय्यं वा पुनः कीदृशं सरसं सरसकृतं वसंतस
मयवर्णनं यत्र॥ पुनः कीदृशं अनुगतः संलग्नो मदनविकारः कामविलासो यत्र। यद्वा सरसश्चासौ वसंतश्च तथेति योज्यं॥ अ
थवियोगिनां दुःसहं वायुं कविर्वर्णयन्नाह॥१०॥ दरविगलितमल्लीवल्लिचंचत्परागप्रकटितपटवासैर्वासयन् कान
नानि। इह हि दहति चेतः केतकीगंधबंधुः प्रसरदसमबाणप्राणवद्गंधवाहः॥११॥ दरवसंते गंधवाहो वायुः चेतो दह

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वसंते गंधवाहो वायुः स्वेनोदहति॥ अथोत्र विहरणं किं कुर्वन् स्वकाननानि वासयन् वनानि सुरभीकुर्वन्। दरविदलि-
तायाः ईषद्विकसिताया मल्ल्याः मल्लिकाया वल्लीकुलतामुवंचद्भिः रजश्छटैः परागैः पुष्परेणुभिः प्रकटितपटवासैः प्रक-
टीकृतपटवासचूर्णैः। अनेकपटवासवासनेनात्यत्वं दर्शितं पुनः कीदृशः केतकीगंधबंधुः केतकीपुष्पसौरभ-
सहचरः तेन सौरभ्यं चकथितं। पुनः कीदृशः प्रसरतः प्रकटीभवतो ऽसमबाणस्य कामस्य प्राणवत् प्राण इव।
अथवा। प्रसरता कामबाणेन प्राणवाही सौगंधवाहस्त्रेतिकर्मधारयः॥ वसंतवायोस्त्रयस्तत्त्वादेवशीतलत्वं
अत एव शीतलेनापि दक्षिणानिलेन दाहकृति चित्रं। दृषद् दर्पे दरोऽव्ययम् इति विश्वः॥ परागः कौसुमे रेणौ स्नानीयादौ रज-
स्यपीति अमरः। हि हि तावधारणे। इत्थंविधः स्वेनोदहतीत्यर्थः॥ पंचबाणत्वादेवासमबाणत्वं तदुक्तं च स्मरते। हर्षणश्च
प्रहसनो मोहनो मूर्छनस्तथा। विद्रूपणश्च कामस्य शराः पंच प्रकीर्तिताः॥१॥ प्राणनाम पिवाङ्मनश्चे मगंधवहश्चेत्
उन्मत्तश्च। वसंतदिवसानामनंगोद्दीपकतया विरहिणां दुःसहत्वं वर्णयन्नाह॥ उन्मीलन्मधुगंधलुब्धमधुपव्याधूत
चूतांकुरक्रीडत्कोकिलकाकलीकलकलैरुद्गीर्णकर्णज्वराः॥ नीयन्ते पथिकैः कथं कथमपि ध्यानावधानक्षण
प्राप्तप्राणसमासमागमरसोल्लासैरमी वासराः॥१॥ अमी वसंतसंबंधिनो वासराः दिवसाः पथिकैः पान्थैः कथं कथम-
पि अतिवर्तनीयप्रकारेण कष्टसृष्ट्या वा नीयन्ते प्रेर्यन्ते। उल्लिंघिता देखमाहा कीदृशाः उन्मीलन्मधुगंधेत्यादि १

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

धवीकसौरभैर्लुब्धैः सरभसैः मधुपैर्भ्रमरैर्व्याधूतेषु कंपितेषु कंपितेषु चूतांकुरेषु कोकिलानां कोकिलानां कलकूजितैः स-
त्कर्णावकर्णमधुरकोलाहलैः कष्टेन कृच्छ्रेण उदीर्णः प्रकाशितः कर्णज्वरः श्रवणोपतापो येषु दिनेषु कथंभूता इत्यपेक्ष्य-
ह। ध्यानेत्यादि ध्यानेन चिंतनेनावधानमेकचिंतनं यात्क्षणप्राप्ता या अल्पकालमनुभूता या प्राणसमा या स्त्री वितद्-
दृश्या कांताया समागमरसे संबंधस्वरूपरसेनोल्लासैर्हर्षहेतुभिः यद्वा कथिकविशेषणमेतत्। मधु पिबतीति म-
धुपः अतो उपसर्गे टकः। व्याधूत इति धूञ् कंपने क्तः॥ आम्रश्चूतो रसालोस्त्री इत्यमरः॥ अंकुरोऽभिनवोद्भिदि इति श-
काकली तु कले सूक्ष्मे ध्वनौ तु मधुरास्फुटे। इत्यमरः। उद्गीर्णः। गृ निगरणे रीत इति क्षतो ती चेइपरत्वे चातिदीर्घस्य
निष्ठातो नः पूर्वस्य द इति निष्ठानस्य कारस्य णत्वं। पांथः पथिक इत्यपि अमरः। वा क्लीबे दिवसवासरौ इति॥ साव-
माद्यलहामनविरहिरणः कांता विपक्षी तत्यबोधत इति प्रसिद्धः। विरहविधुरायै राधायै माधवं सखी दर्शयति। ए-
व। अनेकनारीपरिरंभसंभ्रमस्फुरन्मनोहारिविलासलालसं। मुरारिमारादुपदर्शयंत्यसौ। सखी समक्षं पुनरा-
ह राधिकां॥ १॥ असौ सखी पुनरिदं गीतं वक्ष्यमाणं राधिकामाह। उक्तवती। कीदृशी सखी। आराद्दूरे समक्षं यथा स्यात्त-
था उपदर्शयंती। दर्शनविषयीकारयंती। कीदृशं हरिं अनेकनारीणां परिरंभसंभ्रमेण आलिंगनादरेण स्फुरन्नितस्ततो गच्छ-
न्दृश्यमानः स चासौ मनोहारि। विलासे लीलया वांछा तस्यास्तत्र मत्तम् इति। तयमुद्दूरमादरमिति शाश्वतः। मुरादैत्य

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

विशेषस्तस्यारिः शत्रुः आराद्दूरसमीपयोरित्यमरः। अस्मिन्नेव श्लोकार्थं गीतेनाह। छ। गीतस्यास्य रामकरी रागः रू
पकतालः॥ रामल्ल हृणं॥ सर्वोपप्रसा तासमलक्षणं च॥ नीलं तिचोलं स्वत नोव हवी। कोनेपदे यत्तमधिशिप्ते तपिमा
नोन्नताणमकरी प्रदिष्टा॥ राग॥ छ॥ हरिरिह मुग्धवधूनिकरे। विलासिनि विलसति केलिपरे॥ ए॥ हे विलासिनि मुग्धा
स्वरूपमिति विकारवति राधे इह मुग्धवधूनिकरे मनोहरतरुणीवृन्दे हरिर्विलसति। स्वच्छः क्रीडां करोति। कीदृशे के
लिपरे। क्रीडापरायणे किं भूतो हरिः॥ चंदनचर्चितनीलकलेवरपीतवसनवनमाली केलिचलन्मणिकुंडलमं
डितगंडयुगस्मितशाली॥ १॥ चंदनेन मलयजेन चर्चितमनुलिप्तं नीलं श्यामं कलेवरं शरीरं यस्य। पीतं पीतवर्णं व
सनं वस्त्रं यस्य वनमाला अस्तीति ततः प्रत्येकं कर्मधारयः यद्वा। चंदनचर्चितं च नीलकलेवरं च पीतवसनं च वनमा
ला च एतानि विद्यन्ते यस्य स तथा अतइनवनाशितपरकरणात् करोतादपि निप्रत्ययः। कीदृशः केलिना चलती म
णिकुंडले ताभ्यां भूषितगंडयुगलं यस्य। स्मितशाली ईषद्धास्यवान् अत्र एवं कर्मधारयः। कलेवरं शरीरेपि
वोद्यतांडे कलेवरं इति धरणिः। वसनं च वस्त्रं भित्यपि स्मि शईषद्धसने कृप्रत्ययः केचित्तु स्मितमीषद्धास्यं विद्यते
अस्य स मयीशालि शिनिप्रत्ययः। तद्धितार्थिकारीयइति सुन्दरं सुदर्शन्ति। वधूनीरीस्नुषास्त्रीचैतन्ये
कार्थवर्गेपि चित्तेन्वात्॥ सामान्यस्त्रीवाचको वधूशब्दः वधू यद्वा। केलिपरः परमपुरुषार्थी यस्य तस्मिन् दृशः सम्योग ११

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

न्ति तेन विलासं सु गोपीनां चेष्टितमाह ॥ ॥ पीनपयोधरभारभरेण हरिं परिरभ्य सरागं । गोपवधूरनुगायति काचिदुदंचितपं
चमरागं ॥ १ ॥ काचिद्गोपवधूः पीनयोः पयोधरयोर्भारभरेण विपुलकुचगौरवातिशयेन सानुरागं यथा स्यात्तथा हरिं परिरभ्याः
लिंग्य मुहुः चित्तं पंचमरागं उदंचितं उच्चतं पंचमरागस्य पश्चाद्गायति । गानं करोतीति [illegible] पंचमाख्यो रागः त
दन्तरं तया गीतमित्यादि शृंगारे पंचमस्वरबाहुल्यमिति शास्त्रे कथितः । तथा च संगीते मध्यमपंचमस्वरैर्हास्यशृंगारयो
रिवेदितिपंचमो रागभेदे स्यात् । पंचानां मपि पूरणे । पंचमस्वरोद्भवे पंचमोपंडवे स्त्रियामिति विश्वः ॥ ॥ काचिद्विलासविलो
लविलोचनखेलनजनितमनोजं । ध्यायति मुग्धवधूरधिकं मधुसूदनवदनसरोजं ॥ २ ॥ काचिन्मुग्धवधूः मनोहर
त्वितोऽधिकमतिशयितं यथा स्यादेवं मधुसूदनवदनसरोजं मुखकमलं ध्यायति चिंतयति । ध्यै चिंतायां धातुः । कीदृशं
विलासविलोलयोः कलस्य तिर्यक् विलोचनयोश्चक्षुषोः खेलनेन संचारेण जनितमुत्पादितो मनोजः कामो येन सत
था तं खेलनमिति षिल संचारे ल्युट् ॥ वराङ्गे मनसिजः कुसुमेषुरनङ्गः इत्यमरः । वक्त्रास्यवदनं तुंडमाननं मुखमित्यस्य
रे सिजातं सरोजं अनेहः [illegible] ॥ ३ ॥ कापि कपोलतले मिलिता लपितुं किमपि श्रुतिमूले । चारु चुचुंब नितंबवती दयि
तं पुलकैरनुकूले ॥ ४ ॥ कापि नितंबवती गोपी दयितं प्राणप्रियं श्रीकृष्णं चारु यथा स्यादेवं [illegible] चुचुंब चुंबनमकरोत्
कीदृशी [illegible] किमपि कार्यं लपितुं वक्तुं श्रुतिमूले कर्णमूले मिलिता संलग्ना इति कंपनात् चुंबने हि सखीहास्यकरमिति वा

Dr. Urmila Sharma Collection, Varanasi

गी०टी०रा० नेमतदारध्यामिलाव।कीदृशी।कपोलतले।पुलकैरोमोद्गमैरनुकूले।कांतस्तेन कथ्यकरेतनत्कस्मा
पितदीयसंगमात्।सा चिकाताविजातेत्यक्त स्वरूपानुकूलयोस्तुल्यमित्यमरः।श्रुतिश्रवणावेद्ययारिति ध
१२ रणिः॥स्वरस्तलाव्यो मात्र स्वरजंभोगोपवेप्यपु।वैवर्ण्यमश्रुप्रलय इत्यष्टौ सात्विका स्मृताः॥४॥केलिकला
कुतुकेन च काचिदमुं यमुनाजलकूले।मंजुलवंजुलकुंजगतं विचकर्ष करेण दुकूले॥५॥का
पि गोपी हस्तेनामुं कृष्णं दुकूले पटवस्त्रे विचिकर्ष आकृष्टवती तिलाव।यमुनेकूले कालिंद्या विपि
नोपलक्षिततीरे॥यद्वा।यमुनायाजलं यमुनाजलं तस्य तीरे।मंजुलो मनोहरो वंजुलो वंजुलो वेतरसो व
यत्र कुंजे तत्रागतं मिलितं।कुंजके पि निकुंजकुलं हत्यमित्यमरः॥चकारपूर्वीपे चायमसमुच्चयार्थः॥मनोज्ञं मंजुलं इत्यम
रः॥वंजुलो वक्कुलेरव्याते वंजुलो वेतसे मतः इति धरणिः॥दुकूलपट्टवाससि इति वि॥वनेकाननतोययोरिति चाकेलि
कुतुकं केलि इति इतिकर्मपदं।नदुकूले गृहीत्वा हरिमाकृष्टवतीत्यपि विरोति कुं चा हरिमात्मसमीपं निनाय धायेत्याकु
अत्र गृहीत्वेतःध्यसूहार्यं सा गौरवपरहत्वया न रुचिर्ज्ञायते॥६॥करतलतालतरलवलयावलि कलितकलस्वनवंशे
रासरसे सहनृत्यपरा हरिणा युवतिः प्रशशंसे॥६॥ काचित्तरुणी हरिणा हतैन प्रशंसे प्रशंसिता कर्मणि लिट्
कीदृशी॥रासरसे गोपस्त्रीडानुरागे सहनृत्यपरा सहकालं नृत्यती।पुनः कीदृशी॥करतलयोर्हस्तयोस्त १२

CC0. In Public Domain, Digitizagtion by eGangotri

लेनच पेटध्वनियतरलयां चंचलया वलयावल्याकपटं श्रेणीललितः संयुक्तः कलः स्वनो वंसोत्थक्रममधुच्छाष्टसहितो वेणुर्येन
तत्कम्पपेटे तत्करस्वरूपानूर्ध्वयोस्तलमिति विश्वः। रामः। कोलाहलध्वनेगोप्यक्रीडनयोर्मत इति विश्वः। श्लिष्यति कामपि चु
म्बति कामपि रमयति कामपि रामां पश्यति सस्मितचारुपरामपरामनुगच्छति वामां॥७॥ गोपीश्लिष्यति आलिंगति कामपि
रामां चुम्बति। कामपि रमयति क्रीडयति। सस्मितचारुमनोहरां यथा स्यादेवं परां श्रेष्ठां पश्यति। अपरां अन्यां रामां तासु
णीं सुदक्षिणां वा अनुगच्छति। पश्चाद्व्याख्यानीयोऽर्थः॥ रामायोषित्नितंबिनी त्यमरः सुदक्षिणे मतो रामो रामा योषित्वरस्त्रीति ति
धरणिः॥छ॥ श्रीजयदेवभणितमिदमद्भुतकेशवकेलिरहस्यं। वृंदावनविपिने ललितं वितनोतु शुभानि यशस्यं॥८॥ श्रीज
यदेवकवेरिदं भणितं वाक्यं तु यशस्यं ललितं वितनोतु॥ कल्याणानि तनोतु। अर्थात् गायतां श्रृण्वतां वा कीदृशं अद्भुतमाश्च
र्यकरं केशवस्य केलिरहस्यं क्रीडा हर्षो यत्र गोपीनां समस्तयाराहित्येन युगपत्सर्वासां केलिनाप्रीणना दृष्टिकरं पुनः की
दृशं विपिनविनोदकलया विपिनविहारकौशलेन वलितं संवलितं यस्य स्यंयुवासेहितं साधुवातवदितमिति याववत्॥छ॥
अधुना राधायैकृष्णकेलिचातुर्यं पुनः कथयन्नाह॥ विश्वेषामनुरंजनेन जनयन्नानंदमिंदीवरः। श्रेणीस्या
मलकोमलैरुपनयन्नंगैरनंगोत्सवं। स्वच्छंदं व्रजसुंदरीभिरभितः प्रत्यंगमालिंगितः। श्रृंगारः सखिमूर्त
तिमानिव मधौ मुग्धो हरिः क्रीडति॥१॥ हे सखि हे राधे मधौ वसंते मुग्धो मनोहरो हरिः क्रीडति। कइव मूर
तिमान् शरीरी श्रृंगार इव। किं कुर्वन्। अनुरंजनेन अनुरागेण विश्वेषां वधूनां स्तंसारिणां वा आनंदं

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

हर्षं जनयन् उत्पादयन्। पुनः किं कुर्वन्। इंदीवरश्रेणी नीलनलिनमाला तद्वत् श्यामलकोमलैः। लक्ष्म
नो हरेरंगैरवयवैरनंगोत्सवं कामहर्षं उपनयन् उपस्थापयन्॥ पुनः। कीदृशः स्वच्छं व्रजसुंदरीभिः स्वतंत्रगोपी
भिरभितः। सर्वतो नानाभावेन प्रत्यंगमंगमवयवमवयवं आलिंगितः। गोपीभिरेकदालिंगनेन यया यदंगमाश्लिष्टं तदेवा
लिंगनमिति प्रत्यंगमालिंगितो भवति। कश्चित्तु स्वच्छंदमित्यालिंगनक्रियाविशेषणमित्याहुः तन्मेव। पदमिल
हा श्रृंगारोपी दृशः एवं वर्तते तत्रापि सर्वतो योज्यं। श्रृंगारः स्वरसे देस्यादाद्यरसे वगजमंडने इति विश्वः॥ पुंसः स्त्रियां स्त्रियाः पुंसि॥
संभोगं प्रति या स्पृहा श्रृंगार इति संख्यातो रतिक्रीडादिकारणमिति वा॥५॥ श्यामो भवति श्रृंगारः सितो हासः प्रकीर्तितः इति स्मृ
तः। विश्वः शब्दः सर्वपर्यायः संसारवाची वा। इंदीवरं तु नीले स्मिन् इत्यमरः कालः श्यामलो मेचकौ इति च। मधुश्चैत्रो मधुर्दैत्यो
मधुकोपि मधुर्मतः। इति शाश्वतः। प्रत्यंगमिति वीप्सायामव्ययीभावः मर्यालेनित्सपदः सह चेद्देतुमाह॥ ३॥ अद्योत्संगव
सद्भुजंगकवलक्लेशादिवेशाचलं प्रालेयप्लवनेच्छयानुसरति श्रीखंडशैलानिलः किंच स्निग्धरसालमौलिमुकुलान्यालोक्य
हर्षोदयादुन्मीलंति कुहूः कुहूरिति कलोत्तालाः पिकानां गिरः॥१२॥ अद्य इदानीं वसंतसमये श्रीखंडशैलानिलो मलयानि
लः उत्संगे क्रोडे वसंतो वसतिष्ठमाना भुजंगाः सर्पाः तेषां कवलक्लेशात् ग्रासोपतापादिव ईशाचलं हिमालयं प्रालेयप्लवने
च्छया तुषारमज्जनेच्छया अनुसरति। अनुगच्छति। इवशब्दः उत्प्रेक्षायां। उत्प्रेक्षा सि व्यंजकः तदुक्तं मन्ये शंके ध्रुवं प्रायो नूनमित्येवमादिभिः
उत्प्रेक्षा व्यंज्यते शब्दैरिवशब्दोपि तादृशः इति। उत्प्रेक्षालंकारोयं यथा प्रकृत्यैव स्थिता वृत्तिः तेन तस्य तरस्य सो अन्यथोत्प्रेक्ष्यते य
त्तासु धर्मेषां विदुर्बुधाः। इति न केवलमिदमेवमिति नावक्ष्यपरमुत्प्रेक्षितं इत्याह। किंचेति। किंच पक्षांतरे पिकानां कोकिला १२
नां गिरो वाक्यरचना उन्मीलंति उल्लसंति कीदृशाः याः कुहूः कुहूरिति कलोत्तालाः कुहूकुहूरित्याकारेण अव्यक्तमधुरध्वनिना

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कलोमधुरउत्ताला विस्तृताः प्रगल्भावा उद्वेलालापोल्लाला इत्यमरः केलिवनकुहःकुह्रूःकुह्रू इति गिरन्ती लतिकलोत्ताला
कलोमधुरउत्तालाउद्धतः ध्वनयः एवपदं तिकस्मात् स्निग्धरसालमौलिमुकुलानि कोमलचूतस्य नवकडुमलानि आलोक्य
दृष्ट्वा हर्षाद्यादानंदोद्रेकमारभ्य विदह्य जांगे इति पाठः॥ अद्विपदस्य वैयर्थ्यात् ईर्ष्यावलोमिति ईर्षाख्या सौ अवलमृत्युति
भूतोरसालस्तु त्पत्तिः प्रालेयं मिहिका चाथ हिमानी हिमसंगतिः। अमरः श्रीखंडोपलहितः शैलः आमश्चूतोरसालोऽसौ
त्यमरः॥८॥ इदानीं कथोपक्रमं त्यत्काकविर्लीकाना हिषयति। रासोल्लासभरेण विभ्रमभृतामाभीरवामभ्रुवां अभ्यर्णे
परिरभ्य निर्भरमुरः प्रेमांधया राधया। साधुत्वद्वदनं सुधामयमिति व्याहृत्य गीतस्तुति। व्याजादुद्भटचुंबितः स्मितमनोहा
री हरिः पातु वः॥ इह हरिर्लक्ष्मीवीयुष्मान्पातु रक्षतु। कीदृशः रसोल्लासभरेण गोपक्रीडा हर्षातिशयेन विभ्रमभृतां ला
लित्य युवतीनां शृंगारचारधारिणीनां आभीरवामभ्रुवां गोपांगनानां अभ्यर्णे समीपे निर्भरं गाढं यथा स्यात्तथा उरः व
क्षःस्थलं परिरभ्य आलिंग्य राधया उद्भटं चुंबितः प्रकटेन चुंबितः कीदृश्या राधया प्रेमांधया अनुरागातिशयेन नेत्रहीनये
व। कथं चुंबितः इत्यत आह गीतेति गीतस्तुति व्याजात् गानप्रशंसा छलेन किं कृत्वा त्वद्वदनं तव मुखं सुधामयममृत
मयं साधु सोत्तममिति व्याहृत्य उक्त्वा कीदृशो हरिः स्मितमनोहारी तस्याः चुंबनकौशलमाकलय्य स्मितेन मनोहर्तुं शीलं य
स्य स तथा। ताः खील्ये गिरिनिः गोप आभीरः इत्यपीत्यमरः वामे मनोहरे सुभ्रौ यासां तास्तथा अभ्यर्णे निकषोऽपि च ति धरणिः पा

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

×दीना×२

चितिपारब्धे आसंसायां लोप्युः ॥ ४३॥ ॥ इति श्रीमज्जगद्धरविरचितायां गीतगोविंदटीकायां प्रथमः सर्गः ॥ ॥ ४३॥
अथ हरौ राधा तावातिचम्य परिहासमतमा सखीमाह ॥ विहरति वने राधासाधारणप्रणये हरौ विगलितनिजोत्कर्षा
दीर्ष्यावशेन गतान्यतः ॥ क्वचिदपि लताकुंजे गुंजन्मधुव्रतमंडली मुखरसिखरे लीना दीनाप्युवाच रहः सखीं ॥ १ ॥ राधा स
खीं रहो गोप्यं गीते वक्ष्यमाणं उवाच । उवाच उक्तवती । वयस्यां अहंकिमर्मीकः कीदृशी हरौ वने हरौ कृष्णे विहरति क्रीडति
सति व शीनं अस्माभिः स्तुतया अन्यत्र चलिता । कीदृशो हरौ साधारणप्रणये अन्यगोपीवत्स्यपेक्षि तिकत्तस्यैर्ष्या अतश्च
हृद्यविगलितनिजोत्कर्षात् अहमेवातिप्रणयवतीति वक्रुमानात्स्यावात् कीदृशी क्वचिदपि लताकुंजे लीना कन्न
लितलताच्छादिते निजोत्कर्षात् दूरगृहे तिरोहिता यद्यपि कुंजशब्देन लताच्छादितगृहमुच्यते । लताशब्दः
वार्थः तृणादिस्वहस्तिरस्कार्यं लतापदोपादानं अतएव निकुंजकुंडौ वाल्मीवेल्लता दिपिहितोदरे इत्यत्रापि
आदिशब्देन तृणादिपरिग्रहः । कीदृशे कुञ्जे गुञ्जन्ताः कलं ध्वनन्तो मधुव्रतानां भ्रमराणां मंडली
तिः ख्ये: मुखरं शाखाग्रं शिखरमग्रभागो यस्य । कीदृशी दीनापि सोत्कर्षप्रणयवती मातरि
स्कृत्याधुना गोपीषु प्रणयो यस्य दर्शितः रहिता । यद्यपि दीना तथापि तत्परिहासेन वशीकृ
तहृदया न कुप्यति कीर्तयतो रसेति तावत्प्रणयपरे (मि) विश्वासेयाज्ञा प्रणयं यो रिति विश्व अ १४
न्यत इति अन्यादिन्यपश्चस्यापश्च ख्यानी मितिरन्यात स्तिः । मधुव्रतो मधुकरश्च भ्रमरः षट्पदालि

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

यः इत्यमरः। स्यान्मंडलं द्वादशराजके च देशे बिंबे कदंबके चेति विश्वः। मंडलं च षट्पमरास्त्रि लिं
ना। श्लोकोक्तमेवार्थं गीतेनाह॥ब॥ गीतस्यास्य गुर्जरी रागः रूपक तालः। रागलक्षणं पूर्वं चो
क्तमेव। रासे हरिमिह विहितविलासं। स्मरति मनो मम कृतपरिहासं॥ ध्रु॥ मम मनः कर्तृ हरिं चि
द्धं स्मरति। ध्यायति। कीदृशं। कृतपरिहासं विहितविलासं। पुनः कीदृशं॥ ब॥ संचरदधरसुधामधुरध्व
निमुखरितमोहनवंशं। चलितदृगंचलचंचलमौलिकपोलविलोलवतंसं॥२॥ संचरतो इति छतया
अधरसुधया मधुरेणाधरामृतमनोहरेण ध्वनिना शब्देन मुखरितः शब्दितः मोहननामा वंशो येन
मोहयतीति मोहनः नंद्यादित्वाल्लुः। यद्वा संचरदधरसुधामधुरध्वनि यथा स्यात्तथा मुखरितो
मोहनकारी वंशो येन तं। पुनः कीदृशं चलितमावर्तितं दृगंचलमपांगो यस्य च चलंश्चकपोले मौलि
श्चशेखरं यस्य स चंचलमौलिस्तेन तान्नातिगत्वाद्यति इति ध्वनिः कपोले गंडे विलोलश्चलोनतंसः कर्णपूरं यस्य। पश्चायमे
कः कर्मधारयः। अवतंसः वतंसः वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोः अपं चेव हसांतानां यथा वाचा निशा दिशा॥
द्वयं कारलोपः। पीयूषममृतं सुधेत्यमरः। अग्रतागोपि अथा चलमिति धरणिः मौलिः किरीटे मिल्लोइ इति विश्वः॥ ३॥ चंद्रक
चारुमयूरशिखंडकमंडलवलयितकेशं। प्रचुरपुरंदरधनुरनुरंजितमेदुरमुदिरसुवेशं॥३॥ चंद्रकेन विचित्रवर्णोल्ल
केन चारुणा शोभमानानां मयूरशिखंडकानां मयूरपिच्छानां वलयेन संघेन वलयिता वलयाकारेण वेष्टिताः केशा
यस्य तं। गोपबालकानां शोभार्थं मयूरपिच्छैः केशा बध्यंते। अत एव प्रचुरेण विस्तीर्णेन पुरंदरधनुषा सेंद्रचापे

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

नानुरञ्जितचित्तो मेदुरः स्निग्धः स्निग्धयोर्मुदिरो मेघस्तस्येव सुष्ठु मनोहरो वेषो वेद्वर्णो यस्य तं ॥ छ ॥ स्निग्धसान्द्रघनमे
दुर इति धरणिः ॥ अब्दजीमूतमुदिरजलमुग्धूमयोनयः इत्यमरः ॥ गोपकदम्बनितम्बवतीमुखचुम्बनलम्भितलोभं ॥ बन्धुजीवमधु
राधरपल्लवमुल्लसितस्मितशोभं ॥ ३ ॥ पुनः कथंभूतं हरिं । गोपानां कदम्बः समूहस्तेषां नितम्बवत्यः स्त्रियः तासां मुखचु
म्बने तेन लम्भितः प्रापितो लोभो येन । पुनः कथंभूतं हरिं बन्धुजीववद्धमधुरो मनोज्ञो अधरपल्लवो यस्य तं । पुनः कथंभू
तं । उल्लसितस्मितशोभनं उल्लसितो मनोहरो स्मितशोभनं यस्य तं । बन्धुको बन्धुजीवकः ॥ मधुरौ स्वादुप्रियौ तन्नौ ।
इति कोषः ॥ छ ॥ विपुलपुलककुचपल्लववलयितवल्लवयुवतिसहस्रं । करचरणोरसि मणिगणभूषणकिरण
विभिन्नतमिस्रं ॥ ४ ॥ पुनः कथंभूतं हरिं । विपुलाः बहुतराः पुलकाः रोमाञ्चा यस्मिन् तद्भुजपल्लवं तेन वलयितो वेष्टि
तो वल्लवो गोपास्तेषां युवतिसहस्रं येन । पुनः कीदृशं करचरणश्च उरश्च हृदयं च तेषां मणीनां गणो रत्नसमूहस्ते
षां भूषणं अलंकारः तेषां किरणास्तैर्विभिन्नं खण्डितं तमिस्रं अन्धकारं येनेति । मणिः [illegible] विद्या(?) मेखल
षलयोर्मणिः रत्नं मणिरर्जुनो(?)च । कंधरे(?) वोत्तानोर्मणिः इति कोषः ॥ उरो वक्षस्तरो श्रेय इति कोषः तमिस्रं सतिमिरं तमो ध्वं
जलदपटलचलदिन्दुविनिन्दकचन्दनतिलकललाटं । पीनघनस्तनपरिसरमर्दननिर्दयहृदयकपाटं ॥ ५ ॥ पुनः कथंभूतं
जलदस्य मेघस्य पटलं समूहः तत्र चंचलयोः यो इन्दुः चन्द्रस्तस्य निन्दको निन्दाकारी यश्चन्दनतिलकस्तद्युक्तो ललाटो यस्य तं । पुनः कि० १९

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पीतेति पीनौ मांसलौ घनौ स्तनौ कुचौ तयोः परिसरो विस्तारस्तत्र मर्दनं पीडनं तेन निर्दयं दयारहितं हृदयकपाटं
यस्य दयाहीनत्वेनेनं सुखस्य मातः कं गोराणां मुखरंजनकवक्षो मुखितमेवेति भावः इति ॥ ७ ॥ मणिमयमकु
रमनोहरकुंडलमंडितगंडमुदारं पीतवसनमनुगतमुनिमनुजसुरासुरवरपरिवारं ॥ ६ ॥ पुनः कथंभूतं हरिं मणि
मयस्य मणियुक्तस्य सुवर्णस्य यासौ मकरो मकरस्य नदाकृतिस्तेन मनोहरो मनोहरौ कुंडलौ ताभ्यां मंडितं अलं
कृतं गंडयुगं यस्य तं । पुनः कथंभूतं उदारं । उत्कृष्टं । पुनः पीतवसनं । पीतं वसनं वस्त्रं यस्य तं । पुनः अनुगताश्च
स्थिता मुनयो मनुजा लोका सुरादयो असुरा दैत्यास्ते एते वराः श्रेष्ठाः परिवाराः परिजना यस्य तं । यद्वा । अनुगामेषु
मुनिमनुजसुरासुराणां परिवारो मुख्यमेलको यस्य मकरो मत्स्यभेदे दारो मत्स्यश्रेष्ठः इति विश्वः । मनुजा मा
नवा नराः इत्यमरः । परिवारः परिकरः परिकरो परिच्छदः प्रवर्षयोः इति विश्वः ॥ ८ ॥ विशदकदंबतले मिलितं
दलंगम् कलिकलुषभयं शमयंतं मामपि किमपि तरंगदनंगदृशा मनसा रमयंतं ॥ ९ ॥ विशदे विमले कदंबतले मिलितं उपस्थि
तं । पुनः कीदृशं कलिकलुषात् कलिकालजातपापात् भयं शमयंतं । यद्वा कलिः कलहः कलुषः पापस्तयोर्भयं का
मतस्मात् भयं पीडां शमयंतं दूरीकुर्वंतं । पुनः कीदृशं हरिं दृष्टिपातादिना मामपि राधामपि दूरस्थामपि किमपि निर्वचनी
यं यथा स्यात्तथा तरंगत् नेत्रोच्छलन् । अनंगो यस्मात् तादृशा दृष्ट्या मनसा आकारेण तेन तेनः । यद्वा मनसा मां रमय
ति । अहं वरमे । हृदये तस्या योगं विहाय रसमग्नाण लक्ष्मी मयि तरंगतरलं नयनं पातयन् मामपि रमयति त्र्य
ति लावः रमयंतमिति तिकालक्रियाया वर्तमानत्वात् । वर्तमाने निर्देशः । यद्वा मनसा कीदृशेन तत्तरं
गदनंगमेव पतंपति कोपित रंगदनंगदृशा कामिने लपयेः तरंगदृशेति पाठे तत्र तरंगदृशा हरिणा
समं कलुषासह सत्वरं यथा स्यात् देवं रमयंतमिति ॥ आवृषे सहसा अयमिति धरणिः । कलुषं इत्यने
नावमं घोडरितउष्टत इत्यमरः ॥ ७ ॥ श्रीजयदेवभणितमतिसुंदरमोहनमधुरिपुरूपं । हरिचरणस्मर

Dr. Urmila Sharma Collection, Varanasi

णं प्रतिसंचरति कृष्णपवतामनुरूपं॥८॥ श्रीजयदेवभणितमिदं गीतमिदं कर्णे एतादृशं सरसवती सञ्चयः कीदृ
शं। अतिसुंदरं मोहनं मोहजनकं मधुरिपोः कृष्णस्य रूपं यत्र। संप्रति कलियुगे हरिचरणस्मरणं प्रति गुण
वतां धार्मिकानां अनुरूपं योग्यं कलियुगमाहात्म्यात् जयना दिक्षु नमनुध्यानं विष्णुस्मरणमेव महत् श्रेयस्क
रमिति यद्दर्थिनां स्वर्गो नित्यनंदमिति तावत्। मोहयतीति मोहनः इति निघ्यादिवत्॥ अनुरूपस्वला वेसेनापालकप
ञ्छन्देदयो रिति॥ छ॥ अधुना कंठिता राधा कृष्णे चलतृष्णे तस्मिन्नायकमाह॥ ॥गणयति गुणग्रामं ग्रामं भ्रमदंप
नेहदेवहरति रूपगर्वितो दोषविमुक्तनिह्नुतः। युवतिषु वलक्ष्णे कृष्णे विहरिणिमाविना पुनरपिमनो वामक
मं करोति। करोमि किं॥१॥ हे सखि मम मनः चित्तं कर्तृ पुनरपि इदानीमेव कृष्णे कामं अत्तिलाषं करोति किमुपा
यांतरं करोमि मम नायातमिति तावत्॥ कीदृशे कृष्णे युवतिषु तरुणीषु अन्यासु वलक्ष्णे। जातानिलाषे। पुनः कीदृशे
मां विना मां त्यक्त्वा विहारिणि क्रीडाकारिणि। कीदृशं मनः वामं विरुद्धं अनायतमिति यावत्। वामत्वे हेतुमाह। यस्मा
दिदं मम मनः कृष्णस्यापराधस्यापि रूपादिरतिकला कौशलादिकं वा गुणास्तेषां ग्रामस्य समूहं गणयति संख्या
युक्तं करोति॥ त्वमिदपि तातेरपि ततमेवि स्मरणे न हेतेन चेष्टते। सर्वदैव तज्जतमनः इत्यभावः। वाममिति
कृ चिन्मात्रः। तत्पदं त्वामं क्रोधगते हेनेन वाञ्छति॥ त्वमूर्ते क्रोधत्वावेधन्त्रं॥ परितोषं महतीं प्रीतिं वहति धारयति। दी
यमानं व धारणादिकं हरतो। विमुञ्चति। परित्यजति। नीरागे पिजन सानुरागहृदयमिति। अतएव वामगुणाश
ध्यानैरूपादौ मौर्व्यामूहे दृकोदरे। गुणः सत्वादिसंध्यादिहरितादिष्वपि विश्वः। ग्रामः संवसथे प्रोक्तः समूहेपिलिंग
तो इति धरणिः। त्वमेव ग्रामः प्रहादिस्थो णिनिति स्वार्थे णप्रत्ययः॥ सकामं अनुमतो कामे इत्यमरः॥ उक्त विताना नायिके यं लक्षणे चास्या
॥ छ॥ उद्दाममन्मथमहाज्वरवेपमानं रोमांचकंचकित मंगक मावहती संवेदवेपथुघन कलिकाकुलाङ्गी॥ मुक्तेवितानतरतः कवीन्द्रः॥ छ॥ अधुना
कामपीडितां सहमानां राधां सखीं प्राह॥ ॥गीतस्य स्य मालवरागः एकतालीतालः॥ रागलक्षणं चोक्तमेव॥ छ॥ सखि हे केशिमथनमुदारं रम १६
य मया सह मदनमनोरथभावितया सविकारं॥ हे सखि हे आलि मथनं केशिदैत्यस्य नाशकं श्रीकृष्णं मया सह रमय संयोगं कारय। यवा कान्ता इच्छ

CC0. In Public Domain, Digitizagtion by eGangotri

णाईच्छा केशो नगः केशो स्यात्प्रातिकेशथी श्ध्र्धतस्याः केश्पामथनं स्मणेन विश्रमणं केलिमथनं कृत्वाः छंदो सेग तया व्युट्टो नेग सयाध्रु
मनोरथं करोति कीदृशं प्रासेउसारं महंतं। कीदृशपामया मदनमनोरथसंवित्तया। मदनस्य कामस्य मनोरथञ्ज्ञातस्या मुवोतिप्र
यस्त्वति तप्रामयाकीदृशं तं। सविकारं विकारःकामजो भावः। यद्वास्य विकारं कामविकारं कुचोदरादिप्रकटनं तत्सहितं तदुक्तं
सिकसर्वस्वे॥ नातीमूलं कुचोदरप्रकटनव्याजेन यच्चेष्टितं साकांक्षमुकुरीकृएंप्रवलतानीवीनिबंधस्य केशस्य मेसंयमो वुक
मित्रमित्रादिसंदर्शनैः सो तागपाविशेषप्रसक्तिकथनैस्तु सानुरागो गिलो। इति॥ छ॥ निस्तत निकुंज गृहं गतया निशिरहसि निली
यवसंतं। चकितविलोकितं सकलदिशास्तिस्तसरसेनहसंतं। पुनः कीदृशपामया। निस्तत निकुंजगृहं अव्यक्तलतागृहं नयाध्या
सयाएतेनातिसारस्त्रिनंउक्तं॥ तदुक्तं सारते॥ विवाहे तीर्थयात्रादौ बंधनोत्सवकेतया॥ नटनृत्ये तथा केलौ विवादेप्याभसंगतो॥ छ॥
असतीसंकुलेदेशेरतुपतापाद्युपप्लवे॥ चौरिकायातिसारस्यात्तद्द्वाराति हारयेत्॥ इतिपुनःकीदृशं तं। निशि रात्रौ रहसि गो
पस्थानेनिलीयतिष्ठतिस्त्रयवं संततिष्ठंतं। एवं स्तंभानकस्थितस्पतीति सेकुंचितमात्मानं कृत्वा वस्थितमितिभावः कीदृशपामया
चकितेनभक्त्या विलोकितानिरीक्षिता सकलादिग्येया कृत्वह को निलयतीष्टती ति कृत्वा वास्य यमेव वा स्पर्यैहृदयं कोतमनु
रागीविलक्षुयास्वसीयु संगोपनार्थं चेतिभावः कीदृशंतं। रतिरसंभरसस्येनरतो सुरतेरसस्तो वेगउसाहोवातस्य वशेनायनया स्येन
पगेणवाहसंतं। निस्तंतं रस एकांतमिति धरणीः निलीयेति लिंउः॥ अश्लेषणे निपूर्वात्वाप्रत्ययस्यल्यप्॥ रसस्तो वेगउसाहः स्मरः चे
ति नंदैत्यविश्वाविसंमस्तानीतिनघालिवल्तुः अस्यां सकलगाथायां पूर्वार्द्धगामविशेषणं उत्तरार्द्धं हृष्णस्येति बोद्धव्यं॥ छ॥ प्रमथस्त मोग
मलक्षितयापुचाटुशनैरस्तकूलं। मर्द्धधुरसित तासितया निथली कृत्सुद्धरु कूलं॥ प्रथमं समागममलक्षितया अनेककाल

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ज्ञाते नम्रीते नसांनिध्ये न क्रीडितया कीदृश्यां तत्। पटुचाटुशतैरनुकूलं चैल समापनोदृढतरं। संस्तव शतैरनुनये कारकं। एवं दुकूलं तव
ति प्रथममिह देयं प्राप्नुयादिति : सात्र मृदुमधुरवचोभिर्यौनतज्ञं निधाने करतलमप्यगात्रे स्थामयेच्छ स्पर्दस्याच्छुरितमुपरि
मर मारिपिष्टद्धाद्व। प्रथमसमागमे हि कामिन्यो लज्जिता सर्वं भिमानमावहंति या श्लिष्टः केवकिमिति न मया मूढया प्राणनाथ
वुं वत्सस्मि रवचन विनतिः किं कृता किं न दृष्टः। तौ कं कस्मादिति मयवं धूवे हितं चिंतयंती पश्चात्तापं चरति मरुणी वे मित्रेजाके
रसङ्गे तिस्ररतः। कीदृग्रूपा मया मृदुसस्मे श्रान्ये वामधुरे मनोहरे स्मितसाचिवे एषद्धसितजल्पिते यस्यात्तया कीदृश्या। तं हि पि
ली कृतं दृष्टं बंधमेऽघनेडुकूलं उघस्थित पटवस्त्रं येन कांते नैव दत्तेनाकृतं वसनं कांतसंगमे स्वयमेव शिथिलं सर्वं नितं
कं सारते। कांते तल्पमुपागते विगलितानीवी स्वयं बंधनात्। वासो विश्लथमेखलागुणधृतं किंचिन्नितंबे स्थितं एतावत्सखि वे
सांप्रतमहं तस्यांगसंगे पुनः॥ कोसौ कास्मि रतिं च कीदृशमिति स्वल्पापि मे न स्मृतिः कीदृग्रूपा मया। ४॥ किंशाल्ययनायन निवेशतया
खिरमुरं ह्रि ममेव शायानं कृतपरिरंभणं बुवनयाय परित्यक्तनाधरपाने॥३॥ किंशाल्यशयनेन पल्लवेस्तरशय्यायां निवेशतया तदुक्तं
ते। संकेतलोके निभृतस्वोपविष्टं। गाढं परिश्लिष्य निसापिकांते। अन्योन्यगात्रे विशानीव एगात्र॥ हूं हूं तदास्य स्वजन्मा स्विमानं। कीदृशं तं ममैवाग
स्विन्नवहस्तके शायायां सुखसंसुप्त एतद्द्वाश्लिंगनसेद विविक्षुद्रयोस्त्रि। यथा स्वको के अस्य कृदे तद्द्रुतगाटाश्लेष लीलावतन्वनेज नितं
घंमैवाङ्ग॥ अपश्ये सर्वैव मिथुनमयशिथोगेलीयते निकंटां निगदति लिलपूर्वतंडुलंतं हुना द्दः पुनः कीदृग्रूपा कृतपरिरंभणे
द्वनयाः संदूष्यालिंगनसैद तयोः कंनडुक्रंतरने। न। घनकलितकांतश्लो लास्यो परिष्टत्वज्जतियदिनारी धूलकेरोतरीयाक
दनके तं पसुवनं वा विधिशुः कलयति जघनो यश्लोषमेनेक वौ द्दः॥ कीदृशां तं। परिरस्य आलिंग्यकृते अधरपाने येन तं ... तच १८

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अधरं दृष्ट्वा न डिद्धापानं मरस्यन्त्या नयनवदनयुगले ये ति डिद्धप्रचारं। ग्रहणमयन विदध्या दृस्त्रकेचा स्तनादे। कुचयुग हादे डेोम
हूनं चो रुयुगे इति सरत:। पल्लवं कि त्रायं छेद:।। छ।। अलस निमीलित लोचनया पुलकावलि ललित कपोलं। श्रमजल छक
लते वरयाव रमदनमंदा लिनलोलं ।।४।। कीदृशया मया अलसमनं च तन्निमीलितं चेति ताहृशं लोचनं यस्याः यद्वा कामक्लिनवि
लंबेन ति मीलितं पिहितं लोचनं यस्या एतान्तो गिक: काम विकार सूचित: तथा च नायकालंकरणे यत्र मूर्द्धा भ्रमारस्य पाद पर्यंतं क
क्रियाः श्रेलत वि हि तायस्मा त्तस्मादो गिक मुच्यते। अमरेणाप्युक्तं। निवृत्ते चांगसंगात्पां द्विविधो गिकमा ख्रिते।। पुनः कीदृ
शं।। पुलकावलिं ये रोमांचपंक्त्या ललितो मनोहरो कपोलयस्यतं अनेन सात्विका विष्कार: सूचित: तदुक्तं स्तरते।। स्मरणे संगमे वैव प्रियस्या
लोकने तथा।। रेडु त्रयं समाख्याच्च सात्विक: संप्रवर्तते। अन्यच्च नावी विनोचनेव धौ मुकुर्मुकुः केशपाशविश्लेषोद्वत्प द्रो साक्षि
कोः स्मृताः। कीदृशं मया श्रमजल स्फुरताया मंडलिनवा रिणा सिक्तं सकलं कलेवरं शरीरं यस्या स्तया। इत्यपि सात्विक भावस्य सू
चितः। कीदृशं परमदनमद्यात्वर मद्यं तमं आगमनात् आगमदर्शनावदर्षद्धा अतिलोलं अन्पर्यंवं सदृश मिलियावत् अनेन पि
वंचं लागच्चेना पि सात्विक भाव एव दर्शितः सकलं खंडेरागवस्तु लिका ल्लकलेह सिविश्वः। यद्वा श्रमजलं सकलकलेवरे समस्त
कायेस्या स्तया। काये स्वकलेवर मि ति विश्वः। छ।। कोलिक कलरवकूजितया जितमन सिजतंत्र विचारं। श्लथकुसुमाकुल कुंतलया न
खलिखित घनस्तन तारं।।५।। कीदृशया मया कोकिलकलरवे कूजितया कोकिलानां कलरव अव्यक्त मधुरध्वनिः वत् कूजितं यस्य स्या
एतदपि सुरताधिकाच्च सुकंरपिकस्य वैस्ता। दालपू हल्लोचकमयूर कपोत कंठस्य पारापातादि कलध्वनिरंतरस्वं तेने च निश्व सित
स्यत्कं तदा विनादि: संयोजयेद् रनचुंबनमैथुनादैको दृशं। जितमनसिजतंत्रस्य वात्स्यायनादि कृत काम सौत्रस्य बिंबा येयेन

CC0. In Public Domain, Digitizagtion by eGangotri

तं॥ सफलकामत्राणमित्यर्थः॥ कीदृशया मया। पंकजकुसुमावि स्तुति नवनुषा ओकुलो अरुणवस्त्र थे ति एवं कुलं कुलं
स्यास्तया॥ एतदुक्तं भवति॥ कर्मणि पदं गमनविधिना दूतके उत्तानादि रति। कीदृशं तं नखेनलिखितं॥ कृतो घनो लेख
इत्नेन तारोयेन एते नवान्युत्सुरति सुकिं॥ एतदुक्तं भवति॥ आश्लेषचुंबननखच्छता ताडनानि संमर्दनं प्रसूनेरणं तु लि
तानो कृत्वा पुरुषायितस्य नायिकणालेकानो स्तो तरमे वर्ततिवा तराणि तद्रः कृडितं दधि कूड अत्र क्रोकरू इवन्तं नन्त्राधमं
त्यास्तूर्णो रति विश्वः॥ कीदृशया मया॥ ॥ चरणरणितमणिनूपुरयापरिपूरितसुरतवितानं॥ मुखरविसृंखलमेखलया
पकारग्रहं चुंबनदानं॥ ८॥ कीदृश्या मया। चरणयोः पादयोः रणितौ शब्दितौ मणिनूपुरौ यस्यास्तया॥ या मारब्धसंबंध
स्तस्यना या उत्कृतं उक्तं रसिकास्तर्वेस्वे उद्घाटिताया सुरतो यदो रूजाश्रीषितानो रूगतौ तवे ता। याम्पूत दास्यान्यकृ
तो यदास्याः बकुलितं नयनसरोजं नेत्रकमलं यस्याः येन वा॥ एतद्गुस्तुतिकाल सूचकं॥ उक्तं च तत्र तौ॥ मूर्छनांमील
नं चाद्यो स्तुतिकालस्य सूचकं॥ सर्वं मे तत्परिज्ञाय साधु येवयं ततः कीदृशया मयालिः सहावसमर्था निपतिता
तनुलतानाय स्या॥ एतेन स्तुतिकालो वरावस्ताकथिता तदुक्तं भवति। अंगे स्वेदश्च लच्चैव॥ केशवस्त्रादि संवरितिः अतो स्तुति सुखे
नार्थ्या वियोगेच्छा चागम्यते॥ कीदृशं तं मधुसूदनं मधुदैत्यं सूदितवान् मधुसूदनं। यद्वा मधु वसंतेन कामवाञ्छया ज
यस्य तं मधुदैत्यसंहस्यती ति मधुसूदनं॥ धृतो रते कांचीचारमुद्धरा उपानार्थ कीदृशं तं उदितमनोजं उनकामं
इति उत्सर्गादितो धातोर्क्तप्रत्ययः॥ ईषदर्थे दरो वयं इति अमरः अप्यगीत स्यगीतना मालंकारः॥ ७॥ श्रीजयदेव भणितमि

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

दमति वायमधुरिपु निधुवनेशीलो सुखमुत्कंठितगोपवधूकथितं वितनोतिसलीलं॥८॥ इति श्रीजयदेवभणितं करसुखं वितनोतु॥
गायतांश्रृण्वतां च श्रीदृशां अतिशायि ... ख्यावस्य निधुवनशीलसुरतासंधि यंयत्र पुनः कीदृशं उत्कंठितयागोपवध्वा राधिकयाकथितं य
त्र पुनः कीदृशं लीलां श्रृंगाररसावयाक्रियातत्सहितं निधुवनमयो उन्मादकरं विदः इति हारावलीस्वेतावे शीलने शीलमितधर्मः
धुनाकामवासनाराधा आह॥९॥ हस्तस्रस्तविलासवंसमनृजुभ्रूवल्लिमद्वल्लवी। वृंदोत्सारिदृगंतवीक्षितमतिस्वेदार्द्रगंडस्थलं। मांसुदी
क्ष्यविलक्षितस्मितसुधामुग्धाननं कानने॥ गोविंदं व्रजसुंदरीगणवृतं पश्यामि हृष्यामि च॥ हेसखि कानने अलिकगोपांतस्याहं दर्शनयोग्य
पश्यामि। तद्दर्शनेनचहृष्यामि। कीदृशंगोविंदं कानने व्रजसुंदरीगणवृतं॥ गोपीस्त्रमृदुवेष्टितं पुनः कीदृशं मां उद्वीक्ष्यदृष्ट्वा हस्तात्
स्रस्तोविगलितो विलासार्थं वंसक्रीडार्थनिमित्तो वेणुर्यस्य॥ अनेनराधायांप्रेमसंभ्रमस्य सात्त्विकभावो सूचितः॥ किंच नवगारस्यं। कीदृशंसंश्लिष्टरूप
स्फुरितः सर्वतः संपूर्णीकृतः स्फुरत्वितानोरतिविस्तारो येन। कीदृशपामया। सुखशंबाबालविशृंखलाउन्मुक्ताभेखलाकांचीयस्यैः
यद्वा मुग्धस्यशक्षावित्तखलाः अक्रमेण निरूद्धामेखलायस्याः श्रृंखलाकुमुदेकोचांवस्त्रेषाक्रमबंधनइतिविश्वः। स्तियडस्फुरताद्वृश
कौपिल्पाद्यतिक्रमवता कांचीबद्धेत्यर्थः। एतेनविपरीतसुरतत्वं सूचितं तदुक्तं कोके। स्वेच्छयाप्यमि लिवल्लतेयवायोपितिरं वितिपूर्व
बाधितं। अदित्तोद्धूतित्यत्रमेखला। तं निपात्यनखद्विवेष्टिते। वक्रवक्त्रमतिकांवितांङ्क्रिकातामरं नवघनसमुदके। सर्वतः कहितटे
त्वामोयद्दा। श्रेषष्ठंवे सिद्धमुक्तमूर्जितं। सुखरवष्टं खलमेखलयेतियावेनत्यदेतुखयः। अधिगता ज्ञाताश्रृंखलाबंधनंयस्या वष्टित्ता
वयुरि ल्लोपः। पृषोदरादित्वाद्वालोपः। तं कीदृशां कचग्रहणे नकेशपाशपातनेनसुरतंबुबुनेदानंदस्य। इदमपि विपरीतरतारंभसूचनं।
रणकृपाचक्षुद्धानेक्रमक्रमपेनरलितसिध्यति। वितानंक्रमवसरेऽवे येहकर्मीलोलो येन इति विश्वः। कीदृशपामयास्रस्ता वेस्तु स्वस्येमय

×पूर्वपत्रस्याः
द्रुमिदं×७

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

रसालसत्या दरसुकलितनयनसरोजा ॥ तिः सह लिपिशिम तत्र लतया मधुसूदन मुदितमनोज्ञा ॥ ७ ॥ रति सुखसमये स्फुरत सुखशीतिका
लेन रसेन शृंगारेण वा अलसया मेघरया एतेन सुखिसुख स्थानि वधस्य स्थिते उक्तं सानिध्यकत्वकमिति। तं कीदृशी दरसुकलितेक्षणं ॥ यतः पूर्वमद्ध
धूमानि दर्शिता नि पुनः कीदृशी अमदस्सुपल्लीमतीनां कुटिलस्के तलता सुकान्तानां वल्लवीनां गोपीनां दृष्टे समदे अत्र्या इदृवीर्यपरा पूर्वपक्ष
मी दृगांतर्वीक्षितं कटाक्षेक्षणं यस्य ॥ एते मदृष्टिमस्सुखवा रुधयाम नसुन्दरीष ि पथ लास्य चंद्र ि वंदुमः कीदृशी अतिस्वेदेन आर्वि
धर्मेण आर्द्रं स्निग्धं गंडस्थलं यस्या ॥ एतवस्थो रूराधया विलोकितइति नात्पाराधा समागतो करतया सा चिकरापाङ्गस्वेदस्प
तिमाय चो पुनः कीदृशं विलज्जितेन लज्जया स्मितइषधासस्ते देवामृतं तेन मुग्धानन यस्य। रसनेरा रामावघ रत्कपिलिका वि
चासरफस्पलचं विविधो मलासः विलासः प्रेयोनामालंकारः। तदुक्तं दंडिना प्रीतप्रकामानेय ततत्वेयइत्य निधियतो मधु
नामिनायिका मनो ऽङ्कदत्र्यति ॥ ७ ॥ दुरालोकस्तोकस्तवकनवकाशोककलिका विकाशः कासारोपवनपवनोपि
व्यथयति। अपि भ्राम्यद्भृङ्गीरणितरमणीयानमुकुलप्रसूतिश्चूतानां सखि शिखरणीयस्तु सुखयति ॥ १ ॥ पदे सखि
दुरालोको वियोगी नमुद्वेजकत्वात् दुःखेनालोक्यत इति दुरालोक्य नरइति दुरालोकस्तोकोत्पस्तवकोगुच्छो यस्यास्ताइश
स्यानवकाशोककलिकया नूतनाशोकपन्लवाविकाश उद्योतमाव्यथयति पीडयति यद्वा। स्तोकस्तवकनवकाशोककलि
तकाया विकाशउज्झो न मदुरालोकः पोडाजनकत्वात् कसारोपवनो पवनः सरस्समीपस्थः वनदीनो पिव्यथयति। अ
पि सर्वपिदीपयामानुध्ये। कासारोपवनपवनचेनसुषदोपिमोव्यथयति वित्रमितिजाय ः। कीदृशो वातः। दुरालोकस्तोकस्त
कनवकशोककलिका विकाशयतीति कार्मण्यपरा ॥ पश्चाद्धुक्षेत्र एतेन मदचरस्त्रिनयात्म तत्वानिवारकत्व जिनकेवलमेतदेवपूर्वं

Dr. Urmila Sharma Collection, Varanasi

श्रोत्राणां इव सुकलप्रसूतिकलितैः बौद्ध मणिस्वरणीपर्वतेन सुखयति॥ नसुखंकरोति कीदृशी त्वाम्यंतीनां सौरसलोलाद्युपर्य्यप
रिपार्श्वेषु चलंतीनां रंगीणां रलितैः रमणीयामनो ह्रापीत्यर्थः॥ मम च यस्या यौग्य चाम्॥ दुर्लोक इति॥ दुःखेनालोक्यात अत्रार्थे
ईषद्‌दुःखसुखदुखार्थेषु खलप्रत्ययः॥ उदोपदः हायरणी नाम्नैव अधुना स्वर्गालिक विलोकान्ना विषयति॥ ७॥ साह्वल स्मितयमं
कुलोकुलगलद्द मिल्लमुल्लासितलूवलीकमलीक। दर्शितसुजा मूलार्द्ध स्तस्तनौ। गोपीनां निभृतं निरीक्ष्य ललितं कां
चिच्चिरं चिंतयः॥ अत्र मुग्धमनोहरो हरस्तु वः क्लेशं नवः केशवः॥ ३॥ भवतरुण केशवः कृत्स्नो वो युष्माकं स्तम्भ डिक
नां क्लेशंकष्टं हरतु॥ कीदृशः मुग्धः मनोहरः। मोहयुक्तः सुंदरः। पुनः कीदृशः गोपीनां ललितं मनोहरं निभृतमेकांतेनि
रीक्ष्य दृष्ट्वा हर्षोत्कं। विदग्धां चिरं बहुकालं यथा स्यात्तथा अंतर्मनसि चिंतयन् ध्यायन् आस्ते इति निभृतं कीदृशं स
कृत सालिप्रायस्मितमिषद्धसितं यत्र। पुनः कीदृशं। आकुलाकुलो यंता स्तव्यसोगणा दउन्मुक्ता नवलधमिल्लः केशपा
शो यत्र पुनः कीदृशं उल्लासिता उत्तालिता भ्रूवल्ली भ्रूलता यत्र पुनः कीदृशं अलीकेन मिथ्या रूपेण मूलेन वा दर्शिता सुजा
मूलार्द्ध यत्र स्तनौ च दर्शितौ वेति द्वंद्व समासः प्राप्ये गच्छादेक वद्भाव अर्द्धं शाष्टोहस्तस्तनयो रेतिसं बध्यते। दूहा त्यर रू बौ न
धःस्थ यतेस बंधेक मलिस्र बंध्यते लतं ते सावन्य स्तत्व्यापदेशामिति न्यायात्। धमिल्लः संयते केशे सुंदरे स्तहते पिवेतिध
रणिः अलीकं तु मिथ्यायोरिति च॥ दोर्दंड वेस्तु उद्गत्य मरः॥ अलके चोद्‌दुःरहितः केशवो यत्र॥ ॥ इति श्री ज्ञानसुंदरी विरचि
तायां टीकायां सारदीपिकायां द्वितीयः सर्गः॥ २॥ कंसारिरपि संसार वासनाबद्धशृंखलां। राधामाधाय हृदये तत्याज व्र
जसुंदरीः॥ ७१

CC0. In Public Domain, Digitizagtion by eGangotri

कंसारिरपि इत्यस्मिन् श्लोके राधां हृदये आरोप्य व्रजसुन्दरीः गोपीः तत्याज इत्यन्वयः। सह क्रीडन्तीनां सुन्दरीणामपि तासां
त्यागात् राधायामनुरागः सूचितः। कीदृशः राधा संसारवासनया संसारे छाया बन्धः शृंखला इति। च निगडरूपा इति वृत्ति
शृंखलेव बन्धकत्वात् इति भावः। पूर्वानुतापोत्थापकः संसारवासनया इदानीमपि विधुर विरहतामाह॥ छ॥ इ
तस्ततस्तामनुसृत्य राधिकां मनङ्गबाणव्रणखिन्नमानसः। कृतानुतापः स कलिन्दनन्दिनीतटान्तकुञ्जे विषसाद म
धवः॥ ३॥ स माधवः कालिन्दीतटान्तकुञ्जे यमुनातीरलतापिहिते विषसाद विषादं चकार। किंभूतः राधिकामगको
पि मृगतामनतिनीमितरुतोनेकस्थाने अन्विष्य। कीदृशः अनङ्गबाणव्रणेन कामशरक्षतेन खिन्नं दीनं मानसं म
नो यस्य पुनः कीदृशः कृतानुतापः विघ्नता सा सर्वा अन्विष्य राधा अहं दृष्टा इत्यनुतापः इत्यर्थः। पश्चात्तापो नुताप
इति विभूतिरमरः॥ केचिच्च नयोः श्लोकयोः किमर्थं चमत्कारिणः पूर्व श्लोकेन परिहरणं तिरन्तः अर्थयोर्विषाद्यथा
हि पूर्वश्लोकेन व्रजसुन्दरीत्यागमात्रमुक्तं॥ द्वितीयश्लोकेन स्वराधया अन्वेषणं पूर्वकं यमुनातीरे विषादमाह॥ इत्यनयो
रर्थयो भेदः पुनरुक्तिर्नाशपौनरुक्ति विरोधश्च सप्तिश्लोकानि॥ छ॥ इदानीं श्लोकक्रममर्थं गीतमाह॥ ॥गीतस्यास्य गुर्ज
 री रागः॥ यतिमवतालः॥ हरिहरिहतादरतया गता सा कुपितेव॥ हरि हरि इति खेदे। हतादरतया न स्पृष्टा मत्त्वेनसार
राधिकामां यद्यपि निश्चयेन सखीसमूहेन दृष्ट्वा विलोक्य दृष्टा चलितागता सा नान्तरेति भावः। बलिरत्रार्थे इत्यर्थः। कीदृश्या

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मयापि सापराधतया व्यलीकत्वेन हेतुना अतिशयेन न निवारिता गमनान्न निषिद्धेत्यर्थः। यद्वा अतिशयितं तस्यं यस्येति
मयेत्यस्य विशेषणं। क्वचित् धृतमति पाठः॥ तत्र धृतं गृहीतमित्यर्थः॥ छ॥ किं करिष्यति किं वदिष्यति सा चिरं विरहेण॥ किं
कृतेन धनेन किं मदीयेन तेन सुखेन॥२॥ सा राधा चिरं विरहेण चिरकालविरहेण किं करिष्यति किं वदिष्यति मम जनधनादिनेति किं
तो विना सकलमेव निःफलमिति भावः॥३॥ चिंतयामि तदाननं कुटिलभ्रू रोषभरेण शोणपद्ममिवोपरि भ्रमताकुलं भ्रमरेण
॥३॥ तस्याननं मुखं चिंतयामि कीदृशं मुखं शोणपद्ममिव रोषभरेण कोपातिशयेन कुटिले वक्रे भ्रुवौ यत्र तच्च। कीदृक्
मिव उपरि भ्रमता भृंगेनाकुलं व्याप्तं। शोणपद्ममिव रक्तकमलमिव कोपेन रक्तं मुखं रक्तपद्मतुल्यं भ्रुवौ भ्रमरतुल्यं
इति राधाया उपलंकारः तथा चोक्तं च दानन [illegible] अविदितनिदाघ्रृतिः। भ्रमरस्य [illegible] इति पंकजं इति शोणं
कोकनदं [illegible] मरः॥ छ॥ तामहं हृदि संगतामनिशं भृशं रमयामि। किं वनेनुसरामि तामिह किं वृथा विलपामि॥४॥
तां राधां हृदि संगतां मनोविषयीभूतां अनिशं वारंवारं भृशं अतिशयेन अहं रमयामि क्रीडयामि। इह वने तां राधां किं
अनुसरामि। वृथा व्यर्थं किं विलपामि। विरहिणो हि कामिनीं ध्यायंति विलपंतीति भावः॥ छ॥ तन्वि खिन्नमसूयया हृदयं दं।
निरवसादां निर्गतो वसादो मानसंगादिरूपो यस्याः तां पुनः कस्मिन् सति सुचिरमति बहुकालं अनुनयेन प्रीतिवच
सा तां मृगाक्षीं हरिणनयनां प्राणयित्वा प्रसन्नां कृत्वा केशवे कुंजशय्यां लतापिहितशयनं गतवति प्राप्ते सति। कीदृशे कृ
तो वेषः शृंगारादिरूपः सालंकारादिकं येन तस्मिन्। तां कीदृशीं रचिता कृता रुचिरा मनोज्ञा भूषा अलंकरणं यथा तां। तदने
न अन्योन्यालंकारं विधाय तेन अन्योन्यानुरागः सुरतापस्थितः। उक्तमर्थं गीतेनाह॥ गीतस्यास्य वसंतरागः॥ रूपकतालं
रागलक्षणं स्वरूपमेव॥ ८॥ मुग्धे मधुमथनमनुगतमनुसर राधिके॥ ध्रु॥ हे राधिके मुग्धे मूढे मधुसूदनं माधवं अनुगतं अ
नुकूलं॥ अनुसर अनुगच्छ॥ व्रीडारुषेः स्त्रीणां मन्तिशयितो मनोरथो भवतीति दर्शयितुं मधुसूदनपदं। य ५८
द्वा मधुपानरतेन सहेत्युक्तो मधुपानं सुरतमनोरथश्च तत्र स्यादिति बोधितं॥ ८॥ विरचितचाटुवचनरचनच

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

विधारि

णोरक्षितव्रणोपान्तो॥ अथ प्रति मंजुलसीमनिकेलिशयनमुपजातं प१॥ मधुसूदनपदेन रक्षितव्रणोपातो ये नतं मा
नतं गायस्व तन्नमस्कार इति भावः॥ पदद्यणामीतो मानइतिसरतीके। संप्रत्यधुना मंजुलो मनोहरो वंजुलो अशो
कवेतसो वा तस्य सीमनि पर्यन्ते तट इति यावत्॥ केलिशयनं क्रीडार्थं शयनं॥ अनुगतं सीसत्पगतं अतस्त्वं तत्र गामन
मुचितमवश्यमिति भावः। रसनेति न्यायाः ग्रंथे पुरः केल्यर्थं शयनं केलिशयनं॥२॥ घनजघनस्तनभारभरे दरमंथ
रचरणविहारं॥ मुखरितमणिमंजीरमुपैहि विधेहि मरालनिकारं॥३॥ घनजघनस्तनभारभरे घनयोर्निविडयोर्घन
स्तनयोर्भारोतिशयस्तेन भारो यस्याः तादृशी हे राधिके त्वं कुंजमुपैहि उपगच्छ॥ दरमंथरं ईषन्मंथरं चरणवि
हारो यत्र गमने तद्यथा॥ मुखरितो ध्वनितो मंजीरो नूपुरो यत्र तद्वत् क्रियाविशेषणं अतएव मरालस्य राजहंसस्य
निकारं पराभवं विधेहि मंथरगमनेन नूपुरशब्देन च राजहंसस्य सादृश्यं॥ हंसो पि प्रियाह्वानध्वनिं यमंथरस्ते
वगच्छतीति भावः। मरालो राजहंसः स्यात् मरालो हंसमात्रके इति धरणिः॥ धात्वनामनेकार्थत्वेन निःपूर्वः करोतिः
पराभवार्थः॥४॥ शृणु रमणीयतरं तरुणीजनमोहनमधुरिपुरावं। कुसुमशरासनशासनवन्दिनि पिकनिकरे भज भावं
॥५॥ हे सखि रमणीजनस्य मोहनं॥ कुत्सितं मधुं मधुरिपुरावं इति पाठः। तत्र मधुपस्य स्वरं स्वविरावं कुकाकोटं शृणु इत्यर्थः
पिकनिकरे कोकिलसमूहे साधयति प्रायं॥ लीलावाक् जनसंश्रया कीदृशे। कुसुमशरासनस्य पुष्पधनुषः कामस्य शा

Dr. Urmila Sharma Collection, Varanasi

न्नासममालावल्लिगुंज्ञालेयस्यपस्थि न्नहेमाविविमानमपहाय तरुणींजन धृतिं तिशासन मिवकोकिलालापं नीति
भावः ॥ एतेन वसंतकालोयं तरुणीनां तरुणैः सार्द्धं क्रीडितुमिति । तमपि तया कुरुद्दृत्तिं धृतिं तं ॥ केचित्तु कुसुमशा
सनाने ति धस्ये बोधनं वदंति तदसत् ॥ ३ ॥ ऊप्रकुं तरसा निवीहकथार्थ ॥ कलानी ति ताहीलिको णि नि: भावः स
नास्ति सावा लिप्राय लीला क्रियासुवेति विश्वः ॥ ४ ॥ अनिलतरलकिशलयनिकरेण करेण लतानिकुरुंबं ॥ प्रे
रणमिव करजोरुकरे तिगतिं प्रतिमुंच विलंबं ॥ ४ ॥ हेकरभोरु गतिं प्रति विलंबं मुंचत्यज ॥ शीघ्रं गच्छेत्यर्थः यतो
लता निकुरुंबं लता समूहं च यि प्रेरणमिव करेति लतायाः करस्पासं तव मार्गकार्ह । अनिलतरलेन वातचे
रतेन किशलयनिकरेण पल्लव समूहेन करेणेति स्थं कं ॥ ज्ञानरहिता अपि लतास्त्वां कांतविषयं गंतुं समी
पं प्रेरयति । किंतु मादृक्रूप इति भावः ॥ समूहे निकुरुंबमस्त्रियां इत्यमरः ॥ करभोरु इत्यनुरूपं वेच्चे नो सूपस्या ग्रा द
शीति संबोधनं ॥ इदं च विशालकारण मुक्तप्रेयोलंकारः ॥ ५ ॥ स्फुरितमनंगतरंगवशादिव सूचितहरिप
रिरंभं ॥ पृच्छ मनोहर हार विमलजलधरममुं कुचकुंभं ॥ ६ ॥ हे राधे अमुं कुचकुंभं स्तनपृष्ठं पृच्छ गंतव्यं
चेति ॥ कीदृशं अनंगः कामः तस्य तरंगश्चांचल्यं तस्य वशात् आयत्ततायां दिव स्फुरितं स्तब्धं किंभूत ५८
मित्यर्थः ॥ अतः एव सूचितहरेः परिरंभायेन तं ॥ अधिरे प्रियजनानाम मनस्खनाय । स्तनकंपो भवतीति वा भाय

CC0. In Public Domain, Digitizagtion by eGangotri

नः॥ पुनः कीदृशं मनोहरो मुक्तादामलो यत्र तं। यतः पूर्वोक्तं स्तोत्रवति तत्सुमुखाञ्चलं च्यवत्पततीति धूलिः पतिता हिच्च ह्र
नास्तनयोः कुंकुमसामंपंक तस्येह्यालंकारः॥८॥ अधिगतमखिलसखीभिरिदं तव वपुरपि रतिरणसज्जं॥ चंडि रसितरशन
नाखडिंडिममभिसर सरसं तम लज्जं॥६॥ हे चंडि अत्यंतकोपने तव वपुरतिरणसज्जं सुरतसंग्राम यथा भवति एवं म
खिलसखीभिः समस्तवयस्याभिः अधिगतं ज्ञातं। सर्वे गत्यार्था ज्ञानार्था इति ज्ञानार्थः। कीदृशं रसिता शब्दि
ता रसना कांची तस्याः खो ध्वनिः स एव डिंडिमो यत्र तत्तथा। सरसं रसस्य हितं यथा स्यात्तथा देवमज्जलं लज्जारहितं॥ य
था स्यात्तथा अभिसर सरसं लज्जवितं॥८॥ रतिरमणो सज्जयतीति पद्युग्म॥ केशिअरि सारे अनिसार विषये सरस मिति
कथितं शेषेणमेवेदमिति वदंति॥ ७॥ स्मरशरसुभगनखेन सखीमवलंब्य करेण सलीलं॥ चलवलयक्वणितैरव
बोधय हरिमपि निजगतिशीलं॥७॥ हे राधे करेण सखीमवलंब्य सलीलं लीलासहितं यथा स्यात्तथा गच्छ। कीदृशेन
करेण स्मरशरसुभग कामबाणवत्सुभगो मनोज्ञो नखो यस्य। वलयक्वणितैः कंकणशब्दैः हरिं अवबोधय। अहमागता
स्मीति ज्ञापयेत्यर्थः॥ अपि क्रियासमुच्चये॥ कीदृशं हरिं। निजगत्या मत्तगतिरूपस्य निजगतिः कामस्तस्मिन् शी
लमस्माधीयेस्य कामपरवशमित्यर्थः। यद्वा निजमपगतो गमने शीलं स्वभावो यत्र वागमार्थे विहित निजगमन शी
मर्थः॥ यद्वा निजगतिशीलं स्वभावो यस्य ताना तारुण्यगमनार्थमागमनः शीलमपि हरिमहमागता स्मीति बोध
येत्यर्थः॥ शीलं चमाधे स्वच्छा वपि धहरिणः॥८॥ श्रीजयदेवकवचनमधरीकृतहारमुदासितवामं॥ हरिविनिहितमं

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मस्मामधितिष्टतु॥ कंवनटी मतिरामं॥८॥२०॥ श्रीजयदेव भणितमिदं गीतरूपं कर्तृ हरेश्चरित्रे विहित मनसां आ
रोपितविशामां कंवतटीमधितिष्टतु॥ आश्रयतु॥ अधितिष्ठ॥ स्त्रीमां कर्मेति कं वतटी॥ कर्मचेकीदृशी अधरीकृत
हारे येनतदा सिता अतिदूरं क्षिप्ता रामा सुंदरी येन कर्तृतव॥ रमामितिहार आरोप्ये सापिजयदेवभणितेन सरतया
हरी न्ययतइतिसाधः॥ अविरामविरतिर्यथाभवत्येव मितिक्रियाविशेषणं॥ यद्वा अधरीकृतो न्यक्कृतो हारो यत्र॥ उदा
सिता॥ उपविश्रासिता स्थापिता विपरीतसुरतोन्ध्यं राधारूपा रामायत्रतथा॥ उक्तयविशेषणेन राधया विपरीत
रतासिये तत्र विष्णुनेति सूचितं॥७॥ अधुना सखीराधां प्रति हरेः स्पर्शाभिलाषेनाह॥७॥ सामांद्रक्ष्यतिवक्ष्यतिस्म
रकथां प्रत्यंगमालिंगनैः॥ प्रीतिं यास्यतिरंस्यते सखि समागत्येति चिंताकुलः॥ द्रूरे पश्यति वेपते पुलकयत्या
नंदति खिद्यति प्रत्युद्गच्छति मूर्छति स्थिरतमः पुंजे निकुंजे प्रियः॥१॥ हे सखि नेप्रियः पतिर्माधवो निकुंजे निवडांध
कारत्वति एवमेवं कुर्वन्निवास्ते॥ इति सा मान्यतो योजना विशेषणमाह॥ तं पश्यति निरीक्षते दूरत एव निशायय
ति॥ वेपते कंपते॥ [illegible] पुलकयति पुलकं रोमांचं करोति॥ आनंदति हृष्यति खिद्यति खेदाश्चितो भवति
प्रत्युद्गच्छति॥ आगतेति संज्ञाप्रत्युद्गमनं करोति॥ मूर्छति मोहमाप्नोति कीदृशः सन्॥ इत्यनेनप्रकारेण चिंता
कुलश्चिंतया व्याकुलः तत्स्वरूपमाह॥ सामामिति॥ हे सखि राधिकावयस्ये सा राधा मामिमं तादृशाद्दर्शन

६९

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ईक्ष्यते। स्मरकुण्डं क्वचन संबंधिनी कथां वक्ष्यतीत्याशयः पश्यति। प्रत्यंगं प्रतिज्ञारी रचयमालिंगनेः द्वीलिंगया स्पर्ति समागत्य संके
तीकृतं स्थले ऋ हि प्रियं वलि। दृश्यतीति रचि रचे कृपे। लड्डू। स्रजादृशो डीलस्य किनी स्मरागमः॥ वक्ष्यतीति वचनं परि
तोषणे॥ लट् प्रत्ययः। प्रत्यंग मिलंपतीति सखीति सामान्यतो प्यस्ति तथा प्रकरणाद्धाय एवं सखी स्वहस्तेन कुचयो
रंपयतीति भावः। कुलकमाचरती त्यर्थः। कुचि तं कुरुते कयतीति साधुः स्विद्यतीति उपष्ठिदागान्नपुनरयो। लट्
टूस्पात्। प्रियोनामालंकारः। सुदृद्रयोपि कामवशाद्भवेत्। स्वेदस्तंभो ऽथ रोमांचः स्वरभंगो ऽथ वेपथुः वैवर्ण्य
मश्रु प्रलाप॥ इत्यष्टौ सात्विकाः स्मृताः इतिरत्नोक्तेः॥ इदानीं मलिनमारभ्यो गंधर्वलक्षणानाह॥ ८॥ अंतर्लोलिर्लिंपदं
जनं श्रवणास्पापि बहुरुवल्ली॥ मूर्द्धिन्नूपामसृण जदामकुचयोः कस्तूरिकापत्रकं। धूर्त्तानामभिसारसत्वरहृदं
विष्वक्कुनिकुंजेसखि ध्वांतं नीलनिचोलचारुसुदृशां प्रत्यंगमालिंगति॥ ८॥ हे सखि ध्वांतेमंधकारं सुदृशां नायि
कानां प्रत्यंगं प्रत्यवयवं आलिंगति। कीदृशं। अक्ष्णोर्निबयोरंजनं कज्जलं निछिपत्। निस्यमत्। श्रवणयो
कर्णयोः तापिच्छगुच्छावलीं तमालस्तवककृतं लिं निछिपतत्॥ कुचयोः स्तनयोः कस्तूरिकापत्रकं मृगमदप
त्रावलीं छिपदिति सर्वोर्थः आकांक्षवशात् [illegible] सुदृशांकी दृशीनां। धूर्त्तानां परस्त्रीचकानां विष्वक्
सर्वत्र निकुंजे अभिसारसत्वरहृदां॥ अभिसारस्पत्वरं हृदयं मनो। कीदृशं। ध्वांतंनीलनिचोलवत्॥ श्यामलवस्त्र

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वक्षोरुमनोहरं॥ स्फुरदुरस्तवके स्तने हारपतंदेकपोलयोरिति विग्रहः॥ धूर्त्तस्याहं चकेलोके शठं धूर्त्तयोरपि॥
श्रंजनादिकमस्तिसारिकानामपीति दर्शितं॥ अभिसारिकलक्षणमुक्तमेव॥ ७॥ कास्मीरगौरवपुषामभिसारिका
नामारबद्धरेखमभितो रुचमंजरीभिः एतत्तमालदलनीलसमंतमिश्रं॥ तत्प्रेमहेमनिकषोपलतां तनोति॥ ३१॥ एतत्तमिश्रं
कर्त्तृ तासां प्रेमतदेव हेमसुवर्णं तस्यानिकषोपलतां तनोति विस्तारयति कीदृशमेतत्तमालदलवत्॥ तापि छव
त्॥ नीलतममतिशयेन श्यामं अतिशयेन नीलतरमयं॥ गौर अभिसारिकाणां रुचिमंजरीभिर्दीप्तिपुंजैरेखा
यत्र॥ कीदृशानां कास्मीरवपुषां कुंकुमतुल्यशरीरयासां॥ कुंकुमवद्गौरशरीराणां वा॥ अतिगौरनारीणां पार्श्वेत
मोल्लेखासुवर्णं निकषइवोत्प्रेक्षितमिति भावः॥ ८॥ हारावलीतरलकांचनकांचिदाम॥ मंजीरकंकणमणिद्युतिदीपि
तस्य। द्वारे निकुंजनिलयस्य हरिं निरीक्ष्य॥ व्रीडावतीमथ सखीमियमित्युवाच॥ ९॥ अथानंतरं व्रीडावतीं सलज्जां
सखी राधामिमं सखी पुनरिदमिवाच॥ निकुंजनिलयस्य लतागृहस्य द्वारे हरिं निरीक्ष्य॥ दृष्ट्वा व्रीडावतीमित्यर्थः
कीदृशे निलयस्य हारावली हारलतिका तरलकांचनकांचीयंच तरलसुवर्णक्षुद्रघंटिका तस्या दामरशुं मंजीरं
नूपुरः कंकणञ्च तेषां मणयः तेषां द्युतिस्तया दीपितस्योज्ज्वलस्य राधागादतमसि निकुंजान्तरे स्थिते न लक्ष्मस्तु हारे
दीपितस्यास्य वराडीरागः॥ गीतापदं तु॥ मंजुतरकुंजतलकेलिसदने॥ प्रविश राधे माधवसमीपमिह विलासा रतिरसहसि ६१

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सहासितवदने ॥१॥ विलसति विलासे कुञ्जकोटीरगेहे रते श्रृंगाररसपरत आवेग क्षोनहसितं वदनं यस्यास्तादृशी हे मे
दुतरः॥ सुदतरः कुंजतरः वल्लक्षकुंजस्य त्र केलिः क्रीडा तस्याः सदनं गृहमिव तत्र॥ कुंजतरस्य इतितरस्त्वप्रत्ययः॥ कुंज
स्यो ऽपकर्षः अपदर्शितः प्रतिपदमत्र विशेषणे मि है तस्या परंराधया॥४॥ नवतरलदशो कदलसयनसारे। प्रविश
राधेमाधवसमीपमिह विलसकुचकलशतरलहारे॥२॥ तरलं चंचलं चंचलं तद्धारयति। तरलत्वसत्वं तपदन्ने
तनं तरलत्वं चंचलत्वं वत्वद्वोकर लं तैनशयनं शय्या तदेव स्वारो धनं यत्र तादृशो कुचकलशयो स्तरलो हारो य
स्याः राधा विशेषणे ॥७॥ कुसुमचयेन पुष्पसमूहेन रचितं रचितं शुचिवासगेहं विशद वासमंदिरं यत्र केलिसदने त्व
आवासगृहे इति पदयोः पुनरुक्तं चरादिना तस्या दोषानू॥ कुसुममिव॥ सुकुमारः कोमलो देहो यस्याः इति राधा
विशेषणे ॥८॥ कुसुमचयरचितशुचिवासगेहे प्रविश राधे माधवसमीपमिह विलसकुसुमकुसुमकुम
रदेहे ॥३॥ कुसुमचयरचितशुचिवासगेहे॥ कुसुमसमूहविरचितपवित्रवासगेहे हे राधे कुसुमसुकुमारदेहे ॥७॥
चलमलयपवनसुरभिशीते। प्रविश राधे माधवसमीपमिह विलसरसवलितललितगीते॥४॥ चलश्चंचलम
लयपवनो दक्षिणानिलस्तेन सुगंधि शिशिरे तले॥ तस्या वलिता संबद्धा वलिता मनोज्ञा गीतिर्यस्याः इति राधा
विशेषणं ॥ रसवलितललितगीते कुचित्पाठः लतुं क्लेरस्येन संबद्धा ललिता सुंदरा गीति। प्रकारो यस्याः।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

रीतिः प्रचारो यद्वा नेत्रोर्द्ध्वप्रचारककूटयोरिति विश्वः ॥ ४ ॥ विततबकुलताकिशलयशयने ॥ प्रविश
राधे माधवसमीपमिह विलस चिरमलसपीनजघने ॥ ५ ॥ विततबकुललता नूतनकिशलयशय्याने
यत्र ॥ पीनौ मांसलौ जघनौ यस्याः तादृशे । कचित्कुशिशिरमतिपीनजघने पाठः । सुगम एव ॥ ५ ॥ मधु
मुदितमधुपकुलकलितरावे । प्रविश राधे माधवसमीपमिह विलस मदनरसरसभावे ॥ ६ ॥ पुष्पस्य
हृष्टभ्रमरचमरसमूहविततशब्दे मदनरसेनयोर रसश्रपांगस्तस्यसावो तिप्राधौ यस्यामिति राधा
विशेषणं ॥ ६ ॥ मधुतरलपिकनिकरनिनदमुखरे ॥ प्रविश राधे माधवसमीपमिह विलस दशन
रुचिरशिखरे ॥ ७ ॥ मधुना पुष्परसेन तरलः पिकनिकरः ॥ कोकिलसमूहस्तस्य निनदेन शब्देन मुख
रे शब्दायते । कचित् मधुरा पिकनिकरे पाठः । तत्पक्षे मधुरतराये पिकनिकरास्तेषां निनादो रासौ मु
खरस्तत्पर्थः ॥ दशनरुचिरं तदीप्तिः सैव रुचिरं शिखरं यस्याः तादृशे हे पक्कदाडिमबीजानमाणिक्यां
शिखरं विदुरिति शाश्वतः ॥ ७ ॥ विहितपद्मावतीसुखसमाजे कुरु मुरारे मंगलशतानि भणितजयदेव
कविराजराजे ॥ ८ ॥ २१ ॥ हे मुरारे त्वं मंगलशतानि विधेहि ॥ जयदेवकविराजेन भणिते सति । कौ ६२
दृशो विहितः त्वत्सः पद्मावत्याः निजपत्न्याः सुखस्य समाजः संनिध्यं येन तस्मिन्नुक्तविध्य विशाराधेम

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

धवं समीपमिह विलसंतं । तज्जयदेवकविराजे इति भावः । तत्सुबोध एव ॥ अयं च यागो रीतिर्गिरि वीहरुकत
या मनोहरः ॥ ८ ॥ चं स्विन्नेन चिरं वहन्नहं मतिश्रान्तो नरशोतापितः ॥ कंदर्पेण तु राउमिच्छति सुधासंबाध
बाधुरं ॥ अस्यांगतदलं कुरुत्वेण मिहरु हेपलदमीनव ॥ क्रीतेदास इवोपसेवितपदांभोजे इतः संभ्रमः ॥
२ ॥ हे राधे अयं कृष्णस्तावत्सुधासंबाधबिंबाधरं सुधया अमृतेन संबाधो गहनं संचसौ बिंबश्चलौ परस्थे
ति समासः ॥ कीदृशः । चं स्विन्नमनाः सा स्विरं वहन् धारयन् ॥ अति श्रांतः परिश्रुतः कृष्णमन्मथेन कंदर्पेण
तापितश्च । तएव सुधापानवपालाश इति भावः । अन्योपि तापापहारी स्तूयादिना पश्चयदीनादिपाउमिच्छ
ति किंतु निः तस्मात्तस्य कृष्णस्य अंके क्रोडे हरणं मुहूर्तमात्रं हस्ताने अलंकुरु त्वं भूषय ॥ तत्समीपे यावं बि
लेभी योह ॥ इहत्त्वेदास इव सूदसदृशो कृतः संभ्रमः कुतो भयं सबलि इति भावः ॥ यदि नूनमिमं ठस्ते
क्रस्विद्वे पमात्रेण अवलोकयसि तदा एतावतैव चाम आत्मनि प्रसन्नाज्ञाचोऽनीवाकुस्को त्वया दिति भावः अ
तएवोपसेवितनीपदांभोजं येन तस्मिन् । यद्वा पुरूति मानवते दासे सर्वेषामनादरो नवताति दर्शितिनवपद
कृष्णे चिरं वहन्नि तिपावः चकारः समुच्चये । संबाधः संकटे मतः इति रत्नकोषः ॥ बिंबाधुरमित्यधरं बिंब
वेतिविग्रहे उपमितं व्याघ्रादिना सधर्मो दिष्टेनयमिति । बिंबशब्दस्य पूर्वनिपातः सत्त्सावरेजितोन्ये

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ग्रामे आदरे पिवेति विभ्रमः॥ लक्ष्मी हरिप्रिया सं पस्चेतासावान्योषधीश्च वेति धरणिः। ७। सा ससाध्वस
सानंदं गोविंदे लोललोचना॥ सिंजाना मंजुमंजीरं प्रविवेश निवेशनं॥ ८॥ सा राधा निवेशनं सहेतस्थिरं। स
खीवचनात् दिस्पर्या च॥ सिंजनमंजुमंजीरं सशब्दमनोहरनूपुरं यथा स्यात् तथा ससाध्वसं सभयं सानंदं सह
र्षं च यथा स्यात्तथा गोविंदविषये लोललोचना चंचलनयना सकला कुशली वनमाली कथं विदग्धयार
मनीयइति। साध्वसं अनेन विदग्धेन मम मुग्धया अपि मनो विनोदो न वर्तेति सानंदत्वमिति भावः।
८॥ हरिदर्शनं गीतमाह। गीतस्यास्य वराडीरागः रूपकतालः॥ गीतार्थस्तु। हरिमेकरसं चिरमभिल
षितविलासं। सा ददर्श गुरुहर्षवशंवदवदनमनंगनिवासं॥ १॥ राधा तं हरिं ददर्श॥ कीदृशं। एकस्यां रा
धायां रसो यस्य। राधैकानुरागइत्यर्थः॥ एक द्वितीयो रसः शृंगारो यस्य तं चिरं बहुकालं अभिलषितः
कामिने। कामिनो विलासक्रीडायेन गुरुहर्षस्य महाप्रमोदस्य वशं वदमायत्तं वदनं यस्य तं तथा।
अनंगस्य कामस्य विकासो यत्र तं॥ पुनः कीदृशं॥ ४॥ राधावदनविलोकनविकसितविविधविकारविभं
गं॥ जलनिधिमिव विधुमंडलदर्शनतरलिततुंगतरंगं॥ ॥राधावदनविलोकनेन विकसितो लक्षितो विविधो ६२

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

बकुभ्रकारो विकारस्तरंगः कंदर्पपरंपरा यस्यातं जलनिधिः समुद्रः तस्सदृशं मित्यर्थः। कीदृशं उज्ज्वलं विधुं
मंडलस्य चंद्रमंडलस्य दर्शनमालोकस्तेन तरलितश्चंचलीकृतः उपस्थितरंगकल्लोलो यत्र। तत्र यथा उपमा
लंकारः। कीदृशं हरिं ॥ब॥ हारममलतरतारमुरसिदधतं परिलंबितदूरं॥ स्फुटतरफेनकदंबकरंबितमि
वयमुनाजलपूरं ॥२॥ हरिं मुक्ताहारं धरं धारयंतं॥ कुत्र उरसि। हृदये हारं कीदृशं। अमलतरतारं अत्यंत
विशुद्धतारं। पुनः कीदृशं। परिलंबितं नीत्वा दूरे विदूरे तिष्ठति न सारो यस्य तं महालंबमित्यर्थः। स्फु
टः तरः प्रवाहः फेनकदंबः तेन करंबितं मिश्रितमिति॥ यद्यप्यनुकूलपूर विशेषणं यद्यमुनाप्रमि
त्येतावतैव जलप्राप्तौ जलपदं व्यर्थं वाच्यं तथापि जलपदमत्यंतसादृश्यप्रतिपादनार्थं स्फुटार्थमिति के
चित् उच्चैः कूले परिस्रावः स्यादिति विग्रहः दधतमित्यत्र नात्यंतमा ब्रुत्रि तिन्तुमं निषेधः मिश्रणां करं चि
तधरिणः। पूरप्रवाहो विख्यातः पूरणेऽपि गुणेऽपि चेति कोषः ॥ब॥ श्यामलमृदुकलेवरमंडलमधिगत
गौरदुकूलं॥ नीलनलिनमिव पीतपरागपटलभरवलयितमूलं॥३॥ श्यामलं उज्ज्वलं मृदु कोमलं श्याम
लं कलेवरं यस्य तं॥ गौरदुकूलं पीतवस्त्रं परिधानं तं॥ नीलनलिनमिव नीलोत्पलमित्यर्थः कीदृशं नील
नलिनं पीतपरागानां केसरराजीनां पटलैस्तरैः समूहैः वेष्टितं पटलेन वलयितं विवेष्टितं। मूलंय

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

स्य सन्नत्वात्। धस्तूनामनेकार्थत्वेनाधिपूर्वो गम् इति इह परिधानार्थः॥ ३॥ तरलदृगंचलचलनमनोहरवदन
जनितरतिरागं। स्फुटकमलोदरखेलितखंजनयुगमिव शरदि तडागं॥ ४॥ कीदृशं हरिं तरलस्य चंचल
दृगंचलस्य चलनं मनोहरं सुंदरं यद्वदनं तज्जनिता रतिरागोऽभिलाषो यथा नारीणां येन। नारीणाम
तिकामवशत्वादिति भावः। किमिव शरदि शरत्काले तडागमिव॥ कीदृशं तडागं स्फुटकमलस्य विकसितप
द्मस्योदरे मध्ये खेलितं क्रीडितं॥ खंजनयोर्युग्मं युगलं यत्र तत्तथा॥ शरत्काले खंजनदर्शनं सुखितमे
व॥ तदुक्तं। अन्ते भोगो वराज्यपदः कलत्रवारः सुविशुद्धलेखा इति॥ ५॥ वदनकमलपरिशीलनमीलित
ति॥ मिहिरसमकुंडलशोभं॥ स्मितरुचिरुचिरसमुल्लसिताधरपल्लवकृतरतिलोभं॥ ५॥ हरिं कीदृशं। वद
नकमलस्य परिशीलनाय मिलिते मिहिरसमे सूर्यतुल्ये ये कुंडले ताभ्यां शोभा यस्य तं। तथा स्मितरुचि
रुचिरो हास्यदीप्तिसुभगः समुल्लसितो दीप्यमानोऽधरपल्लवः तेन कृतो रतौ लोभो युवतीनां रतापत्तिल
क्षो येन तं। तथा। स्तनयुगे चयिरतिलोलमितम्रगमदाद्यमामः॥ ६॥ शशिकिरणच्छुरितोदरजलधरसुंदर
कुसुमकेशं। तिमिरोदितविधुमंडलनिर्मलमलयजतिलकनिवेशं॥ ६॥ कीदृशं हरिं। शशिकिरणैश्च
च्छुरितस्याच्छुरितं मुद्रामस्यांतरीयस्य जलधरस्य तद्वत्सुंदराः सुकुमाराः केशा यस्य तं तथा॥ तिमिरेऽन्धकारे। उदि ६५

CC0. In Public Domain, Digitizagtion by eGangotri

उच्छ्रितो यो विधुमंडलं चंद्रबिंबं स्तद्वन्निर्मलं मनस्तन्यत्र तिलकं चंदनबिंदुस्तस्य निवेशो वस्थानं यत्र तं त
था ॥ मृगाद्रिणां नागराणां तिलकं चंचच्चुंबिलमवेहि ॥ तस्य चंद्रसामीप्यं ॥ विपुलपुलकसरं उरिलं ति
कोलिकलापिरधीरं ॥ मणिगणकिरणसमूहसमुज्ज्वलभूषणसुभगशरीरं ॥ अकीदृशं हरिं विपुलो धिकः पुलक
न्नरो रोमांचा तिशायस्तेन दंतुरितं नलिनमोन्नत मिति ध्यर्थः ॥ रतिकेलिकलाभिः सुरतक्रीडकयोरधीरं चंचलं मणि
गणानां किरणसमूहेन समुज्ज्वलं दीप्यमानं यद्भूषणं तेन सुभगं सुंदरं शरीरं यस्य तं तथा ॥ ८ ॥ श्रीजयदेववचने विल व
ल्हिगुणीकृत लक्षणेनोरं प्रणमत हृदि विनिधाय हरिं सुचिरं सुकृतोदयसारं ॥ ८ ॥ २४ ॥ श्रीजयदेवस्य भणितं विल
वेन साधित रूपं चेन ल्हिगुणीकृतस्यालंकारस्य सारो यस्य तं ॥ हरिं हृतः सारो हे ॥ यस्य तं सारो चल्ले स्थिरं सेवध्या
यो नीरोधने हिपिवे तिविश्नू ॥ अलंकारवत्या जयदेवकवितायास्तु लेखनालंकारस्य द्वैगुण्यं प्रत्यवतिष्ठेति भावः ॥ ८ ॥
अतिक्रम्यापांगं श्रवणपथपर्यंतगमनप्रयासेनेवाक्ष्णोस्तरलतरतारं पतितयोः ॥ इदानीमेतस्याः प्रियतमसम
लोकसमयं पर्यान्तः स्वेदांबुप्रसरइव हर्षाश्रुनिकरः ॥ १ ॥ कश्चिदक्षप्रणमिति एषयोर्हर्षाश्रुनिकरः ॥ सात्त्विकभा
वेन नेत्रांबुप्रसरः प्रयातः तदिदानीं प्रियतमस्य वल्लभस्य समालोककाले अक्ष्णोर्नयनयोः स्वेदांबुप्रसरणपमाघ

=तलितहि

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

र्मजलप्रवाहसदृशाः। कीदृशयोः तरलतरतारकं चलाक्षकनीनिकं यथा स्यात् देवं पश्यतोः। कथमपांगेन नेत्रान्ते दृ
शा। अशिकम्पत्र्यवशात्तटपर्यन्तगमनप्रयासे मध्यकर्णवर्त्तिगमनायासेनेव त्राहृदसे शायां अन्योन्यमीपत
तीतिध्वनिः॥९॥ अधुनापुनरपि कविराह॥१०॥ तदंत्या स्रज्यांतं उतकपटकंडूलिपिहितं स्मिन्नेत्रांतेगेहाद्बहिता
लीपरिजने प्रियासंप्रयतां स्मरस्समाकुलत्सुतगं मलज्जायां लज्जापि व्यपगमादि दूरं मृगदृशः॥११॥ मृगदृशो
हरिणनयनायाः राधाया लज्जापि तल्लज्जावतीसती दूरं व्यपगमत् दिवागतेव॥ अवहितालीपरिजने सावधाने सखीगे
हाद्बहिर्गते सति छलकपटकंडूलिपिहितस्मिते विहितकसकंडूति। छादितहास्ये तल्यांतं शय्यांतं असज्जंत्याः
तल्पे शय्यायाः द्वितीरे स्मरः॥ अतः शेषः स्वरूपवचनं अंतः स्वरूपे पर्य्यंत विना शोपि कद्यू तद्विधिलिङः॥ इदा
नीमेव वचनादिकमंतरेण बहिर्गमनादीनां सावधानता॥ स्याता परिजनः परिकरे स्मृते सेवके पिवेतिधरणिः
केचित्त्वा आलीचपरिजनश्चेति आलीपरिजनः इतियोजयंति अलीराष्टोडीयंता॥ निवार्य लामोलि किमप्यायं वदुः पुनर्वि
दुरितिवत्॥ पुनः कीदृश्याः प्रियासंसक्तमुखं पश्यंत्याः स्मरस्पर्शान्येषां समाकलोति प्राय स्त्रेमसुतगमतिमनो
हरक्रियाविशेषदिदृक्ष॥११॥ इदानीं समाप्तेकविर्मंगलार्थं स्तुवन्नुपसंहरति॥१२॥ जयश्री विन्यस्तोर्मि हितहवमंदा ६५

Dr. Urmila Sharma Collection, Varanasi

रक्तकुसुमैः स्वयं सिंदूरेण द्विपरणमुद्रामुद्रितइव ॥ कुवलयापीडक्रीडाह्रमकुवलयापीडकारिणः । एतं कौलीनं सकृति
दुर्जीयति ॥ कुलं छेदोमुरच्छिदो ॥३॥ मुरच्छिदः कंसस्य कुडदंडोदंडकारोमदकुर्जीयसितकुंभक्षैता धवृत्तता । कीदृश्य
भुकीसीस्ट एवं कुविशीर्णसि रुधिरबिंदुः स एव स्वयं सिंदूरे मुद्रितचिह्नितइव ॥ कन्दलन्त आह ॥ द्विपरणमुद्राकुंभ
लयापीडेन ये भागाः संग्रामः तत्र तत्र जातो हर्षतया तत्र मेदाये बाहुरत्वं तद्युद्धविचारद इति सेवासिंदूरी ते तइत्या
रायः ॥ मंदारकुसुमैर्महितइव मुरच्छिदइ वा कीदृशैः जयश्रियाजयलक्ष्म्या विन्यस्तैर्दत्तैः तस्समरस्मेषुष्यष्ठ
कुवलिता यत एव मुरच्छिद वीरशराः सकुवलयापीडस्य कुवलयापीडस्य बाहुदंडस्य क्रीडया विलासेनहतकुवलयापीड
नामहस्ती येन तस्य तथा महित इति मही पूजायां क्तः ॥ इति मुद्राविद्रुसंजाता अस्य त्वर्थेन दसंज्ञा तेतार
कादिस्य इत्र तृप्त्यथ ॥ रुधिरस्य कल्लोहिता सूरकन्दतदास्यो शोणितइत्यमरः ॥ मरमसुर विरोधं छिन्त्वान् ॥
मुरच्छिदिति समृद्धिषल्योदिना क्विप् ॥ राधस्य मनसमये मानंदः सहर्षी गोविंदः संस्तोयत्रसलथा ॥ इति श्रीम
हुगद्धदिग्विरचितायां गीतगोविंदटीकायां सारदीपिकायां एकादशः सर्गः ॥ ११ ॥ ...गतवति सखि वृंदेमंद
त्रयात्तरलितेरस्मरपरवशाकूतस्मितस्नपिताधरां सरसमनसं दृष्ट्वा कांतं मुकुंदमुक्तुर्मवपल्लव प्रश्नवराषनेत्र
ह्रियां ॥ १ । सखी वृंदेरं धवयस्या वृंदे कदंबेग

तवहरिः स्रस्तोयथास्तु वाय॥ अद्वैव समाण विशेषः। कीदृशी। मंदस्मुछोयस्वरूपा नरो लज्जातिशायत्नेन
तिर्सरस्मरैति प्रोष्टौ कामः तस्परव शायातो लिप्रायः तेन संबद्धं स्मितमीषद्धसितं तेन स्नपितो व्याप्तो अधरोयस्या
स्तां। क्वचित् स्मितस्नपिताधरमिति पाठः। तत्र स्मितेन स्नपितौ दृष्टौ अधरोयस्यास्तां कर्तरिक्तः। पुनः कीदृशी
स्मरसंसानुरागं अलसं कामाविरीवानंथरं कांतं हस्तेदृष्ट्यामुकुलसुकुसुमः पुनर्नवपल्लवप्रसवैरलिनवकिस
लयप्रबोधैरिवयत्र॥ शय्यमं शय्यायां तत्र विच्छि प्रेपुसाहिते अस्तौ यया तां। तथाविशेषणमेव॥ कांतेदृष्टौ त्येवयोज
तस्य देहच्छि च्छा च्छामिति बहुव्रीहौ स्नवघः दशोः स्वांग इत्यर्थः॥ अस्मिन् सर्गे स्वाधीनभर्तृका वर्णनीया। तल्लक्ष
णं नाथ कालच्छरणे। यस्यारस्त्रिगुणा रुष्टः पतिः पार्श्वं न मुंचति। विचित्रविभ्रमासक्ता सा स्यात् स्वाधीनभर्तृकेति त
देवगीतेनाहाणी तस्यास्य विन्यासरागः। एकताली तालः।। रागलक्षणं।। स्वच्छंदसन्निहितपुष्पचापः प्रियारस
स्याद्रस्तुधरात्रिष्टपः पर्यंकमध्यस्य स्तनतोपवेशो सायः स्तुति इत्यन्वितहेमगौरः॥१॥ गीतानार्थस्तु॥७॥ द्रणमधु
नायणमनुगतमनुसरराधिके। हे राधिके अधुनाक्षरां मुद्रूर्धमनुगतमायन्नानायणा मंजुसम॥ ७॥ किंच
लयत्रायनतलक्रुकामिति निचुरणनलिनविनिवेशो। तवपदपल्लववैरिपराचंद्रमिदमनुसरवक्ष्यसुवेशो॥१॥ ६६
हेकामिति किसलयशायनतलेपल्लवत्त तत्राय्यातले चरणनलिनस्य पादपद्मस्य विनिवेशमर्पणं कुरु।

CC0. In Public Domain, Digitizagtion by eGangotri
Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तदिदं किंचाललयशाखिनेकर्तितपदस्य पल्लव एव वैरी तस्य परागवंति। रक्ताः अस्तु नवं ३॥ पल्लवस्य पल्लवो नववैरी
भवति। यथा राज्ञो राज्ञी तस्य तु। अतः स्तवकस्थितमेवेति भावः। यद्वा स्तवकस्याशुशरणाय पल्लवस्य कोऽतिहरणात् पल्लवो वै
रीपदस्य भवति॥ अतः परं नवकस्थितमेवेति भावः पदं कीदृशं॥ सुवेषमपि मनोहरमप्यसौ पाधसह वैरिणः। किंचाधि
शेषणमेवेदं। तत्स्वरूपवातयोः खड्गस्तु पुष्टेऽचपेटयोरेतेति विग्रहः। आपो नारा इति प्रोक्ता आपो वै नरसूनवः।
अयनं तस्य ताः पूर्वं तेन नारायणः स्मृतः इति विष्णुपुराणे॥ अवेषद्विनारायणविशेषणं वा॥ ७॥ करकमलेन
करोमि चरणमहमागमितासि विदूरं। क्षणमुपकुरु शयनोपरि मामिव नूपुरमनुगतिशूरं॥ २॥ हे राधे त्वं विदू
रमागमितासि। अतस्तव चरणमहमात्मनैव करकमलेन हस्तापदं करोमि संवाहयामि। इह धातुनामनेकार्थ
त्वात्॥ करोति संवाहनार्थः विदूरगमनेन व्यथा जायते। अतः परं संवाहनमिति भावः। क्षणमुपकुरु प्रजा
यामिति वदंति। अत्रापि शयनोपरिशय्यायां मामिवानुगतिशूर अनुगमनसमर्थं नूपुरमुपकुरु। सुत
भक्ता त्वया शय्यायां तव मञ्जुकुरुष्वेति भावः॥ ८॥ एवं वदनसुधां निधिगलितममृतमिव रचय वचनमनुकूलं।
विरहमिवापनयामि पयोधररोधकमुरसि दुकूलं॥ ३॥ हे राधे तव वदनं स्वयं वदे समर्थः॥ अनुकूलं प्रियं

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अमृतमिव॥ कीदृशममृतं। तवयदनमेव सुधालिपिश्चेदुः तस्मादुह्लिं तं फलितं उरसिवक्षसि दृढं स्थपदिहं का
मनयनया मि। स्फोटयति। कीदृशीं। विरहमिवयोगसमसि त्यर्थः॥ पुनः कीदृशीं पयोधरयोरोधकमाच्छादकं
अत एवोपनया मि॥ वियोगोपिकांतं पयोधरस्पर्शे धकों भवतीति भावः। यद्वा पयोधरोमे घोरो धको विरोधी
यस्य विरहस्य तं॥३॥ प्रियपरिरंभणरसरसवलितमिव पुलकितमतिदुरवापं। मदुरसि कुचकलशं विनिवे
शय शोषय मनसिजतापं॥ ३॥ हे कृष्ण मदुरसि मम हृदये कुचकलशं विनिवेशय॥ अर्पय॥ अतिदुःखेन
वाप्यत इति तथा बहुं अत एवं पुलकितं वसिवं संजातरोमांचमस्तु अहा अनेन कर्मणा मनसिजतापं कामपी
डां शोषय खंडय॥ सजलकजलेन अश्रुजातलनया तापापनोदे उज्यत एवेति भावः दुरपद्दति दुःखं सुख
कृष्णधेषर दूर विपुलतु प्रत्ययः॥४॥ अधरसुधारसमुपनय भामिनि जीवय मृतमिव दासं। त्वयि निहितमन
सं विरहानलदग्धवपुषमविलासं॥५॥ हे भामिनि कामकलाकुशले अधरसुधारसम ओष्ठामृतरसमुप
नयदेहि॥ अतः सुधादानेन मां दासं मृतमिव जीव यथा अमृतेन मृतजीवनं स्थिरमिति भावः। कीदृशं
त्वयि विषये विनिहितं संस्थापितं चेतं वेटकचित्त मिच्छार्थ विरहानलेन वियोगवह्निना दग्धं वपुर्यस्य तं। अवि ६७

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

लासंबिलसंस्करहितं॥८॥ सरदूरदेशमंपात्रेना विकेन्द्रस्य धीवस्योपि इति विश्वः उह्येजकनया खिरहानलये
साम्प॥७॥ अक्षिमुखिमुखवस्यमणिरसनागुणमनुगतकंगणिनादं॥ श्रुतियुगले पिकरुतिविकलेमम
मवाह्येमदवसादं॥६॥ हेसखिस्खिवंद्रवदनेमणिमयरसनागुणकांचीदामसुखस्य॥ सदराश्लेषकोम
सां॥ कृहिस्त्री॥ अस्तु दशो गुणः कंकणिनादो यस्य तं॥ गीतस्य हृदयानंदमित्यर्थः॥ यद्वा कंकणिनादं कंकणशब्दमनुगुण
मनुसारं अत्रप्येतिर्यावत्॥ एणो वो विकल्पपदे अनुगुण इति साधुः यद्वा अनुगुणस्य योग्यस्य स्वरस्य निनादः
शब्दो अनुसरणस्तोपायत्र॥ सदरेककवंधकीर्तितइति रत्नाकरः॥ मम श्रुतियुगले कर्णयुग्मे विरहेविरहेण
मोवसादस्तं शमयशान्तं कुरु॥ अवसादकारणमाह॥ पिकरुतिविकलेः कोकिलशब्दैः दुःखिते रसनांशछेन मंद
शब्दवतोः कर्णयोः रूपदशां विजनये त्यर्थः॥ सुखवंकत्येति इति लोके सुखस्येति साधुः॥७॥ मामति विफल
षा विफलीकृतमवलोकितमधुनेदं॥ मीलितलज्जितमिवनयनं॥ तवविरमवस्मरजातिरयेदं॥७॥ हे रा धे
तवेदनेत्रे कर्तृमामवलोकितुं इष्ट अधुना इदानीं लज्जितमिवजातं त्वपमीव मीलितं विधत्ते कीदृशं मां अतिनिष्क
लरुषा निष्फलक्रोधेन विकलीकृतं दुःखितं अतएव संलीनभूतायं नयनं निमीलनं मामवलोक्य विरक्तिसाचर तिखेदं॥
स्मरपादैन्यं विस्मृत्य ज विरमेति श्लोकः पद्यस्मोरसनिरुपस्सोपदं॥८॥ श्रीजयदेवभणितमिदमनुपद निगदि

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तमधुरिपुमोदं ॥ जनयतु रसिकजनेषु मनो ममभर रतिरससारं ॥ नोदं ॥ ८ ॥ श्रीजयदेवकवेरिदं कर्न्तु रसिकज
नेषु च तु रसनेषु मनोरमो मनः श्रीतिकारकोश्त्तिरसना ध्यायेण विनोदं हर्षं जनयतु ॥ करोतु ॥ कीदृशं पदे
पदे लिंगादितं उक्तोमधुरिपोः सहस्य मोदो हर्षो यत्र गीयते तत्र कथा ॥ ब ॥ प्रत्यूहः पुलकांकुरेण निविडाश्ले
षो निमिषेण च ॥ क्रीडाकूतविलोकितेऽधरसुधापाने कथा नर्मभिः आनंदाधिगमेन मन्मथकलायुद्धे
ऽपि यस्मिन्नभूदुद्भूतः स तयोर्बभूव सुरतारंभः प्रियंभावुकः ॥ १ ॥ तयोः राधामाधवयोः स सुरतारंभो विल
सोपक्रमो प्रियंभावुकः ॥ प्रियसेवनशीलो बभूव यातः यस्मिन् सुरतारंभे निविडाश्लेषेण गाढालिंगने
न पुलकांकुरेण रोमोद्गमेन प्रत्यूहोऽन्तराय कृतो निमिषेण क्षिपक्षम चलनेन च क्रीडाकूतेन हर्षलासे
न विलासालिप्सायेण स्निग्धलोकितं च प्रत्यूहो जातः अधरपानेऽधरामृतपाने कथानर्मभिः वाचोकेलि
भिः कथासुखे वीप्रत्यूहो जातः वदनेन द्वयोरपि सहेदर्शितः विघ्नोऽन्तरायं च स्वल्पः दूरः स्मरः प्रियेऽत्यलंयस
ति वा ॥ त्वया ख्विन्नोऽपि शेः ॥ षडेव श्लोकर्तरी तिखकड्रू ॥ ख्विवा सुमागमः ॥ ब ॥ दोर्भ्यां संयमितः पयोधर
भारेण पीडितः पाणिजैः कृतं कीर्णो दशनैः क्षताधरपुटः श्रोणीतटेनाहतः हस्तेनानमितः कचेषु
अधुरसंदेन संमोहितः ॥ कांता कामपि तृप्तिमाप तदहो कामस्य वामा गतिः ॥ २ ॥ कांतो वल्लभः का ६०

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मस्यानिर्वचनीयां निर्वर्णिमहाउ हिंलेसो सकी दृशः दो स्त्रीबाहुल्यां संयमितो बद्धः एयो धरेण्यापी इव : पाणि
जैर्नखैरुक्कीर्णः अविद्धः खंडितइति यावत् दशनैर्दृतेः हताधरस्तुंदस्य सततथा ।। श्रोणितटे कंचपदेशो नखा
द्रवतः ताडितः हस्तेन कचेष्ठना मितेः अधरसुधया उष्टा मत संदने मरन्द्रणे न सोमो हि मः तस्मादेवं तते पिइ
लेमापि अहो आश्चर्यं कामस्य वामदक्षिण्या गतिः दृश्यां दृष्टेर् विषये पियत्वं सिप्राप्ति स्त्रद्धिपरीतमेतियामाना
तएवाश्चर्यं मिथि लुंठबंधना हिनाट मिलास इति भावः अर्थान्तरन्यासो यं ज्ञेयः।। सोर्थान्तरन्यासे वस्तु सि
द्धिरूप किंचन मद्याधनसम र्थस्यैव यद्वतिर्द्वी ।। ७।। तारां केर तिके लिसंकुलरणाङ्गसेन या साहसः घायः
कांतउयायकिं विद्रुपे एप्रारं लियसं स्वमाल निस्पंदा घनस्थली ज्ञि थिलि ता वोर्यु ल्लि रूकूपितं वक्षोमी
लितमाक्षियोरू बस्सः स्त्रागांकतः सिद्धति ।।३।। यथा कांतज यायवल्लतयैया र्थस्त्वमालक्षरतोय
ऐकं विद्रुप श्रियरतिप्रारब्धं साहसप्रायं सहसव कुर्वंयया सव तेवं।। केचर तिके लिः कामक्रीडा तया
संकुलो यो रणाङ्गः यामशापांसोगपकुमे ।। मारस्याकामस्यांकं खिन्नयत्र तत्स्मिन् युद्धपक्षे मारो मारणं
तस्यांको यत्रेतियोज्यं तदेवाह ।। जघनस्थली ति स्पंदा जघनमेव स्थली ज तनवाहिना साचलनसूनोत्य
थेः दोर्वल्लीबाहुता शिथिलता श्रे थिल्यं प्राप्ता वक्षरस्थलउच्छं पिन्न हि निमीलिते स्थडिते।। अन्यथा

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तः स्त्रीणां पौरुषरसः पौरुषेण रसोनुरागः सिद्ध्यते॥ पुरुषेण हि समरे बन्धः कृपादिकं न तु लभ्यते। स्त्रिया तु स्याद् इत्यमत
तरेण नतान्द्रशापो रूष। माध्यमं इति तावं मारस्त्वमारणे कामं इति कोषः जयाये तिना द्रष्टव्यं च तुर्थी॥ ७॥ तत्र पापा
रत्नपाणिना किं तमु रे लिङ्काकषायेद्दृशोनि धरिणिधर श्रोणिमा विलुलितः स्वस्वस्वडोम्र दूजः॥ कांचीदामदर
श्लथायावलमितिप्रातर्निखातैर्दृशोरेति: कामशरैरसादद्भुतमन्त्र तपुर्मनः कीलितं॥ ५॥ एतैः कामशरैः पशु:
स्याति मोमनश्चित्तं कीलितं बद्धं यच्च दद्भुतमाश्चर्यमत्र त्वकैः कामशरैः तस्याः राधायाः पाटल एव ति रक्त
पाणितो नखक्षते नांकितं छिद्रितं तदुरो वक्षः दृशौ नयने निद्राकषायिते। निद्रालो हि ते स्रग्धरो श्रोणिम
उच्छलो हि बन्धिधौता: प्रच्छालिताः केविलुलिताद्रूतस्वनो निच्छिंघास्त एव पस्सस्त्रस्तो गत माल कांः कां
चीदामभे खलपाणौ दरमी षदस्थ्यंश्लथं शिथिलमचलं यस्यास्तत्तथा इति प्रकारेतारां धरण्याः पशु प्रियस्य
दृशो प्रातःकाले तिखातैर्निखदतं जागरस्तुंबनकेशाकर्षणनीवीमोचनादिपंचपंचबाणः कारवेन लिप्तपिता
लिप्सात शरैर्मनः कीलनमद्भुतमेवेतिनावः॥ स्फुतरत्न कृपाटलः॥ इत्यमरः॥ कषायो रसक्लेदे स्यात्निर्यासो ६८
लोहितो न्यवदिति विश्वः॥ शोणाः कोकनदच्छविरित्यमरः श्रोणि तत्राष्टा दिमनि त्रयम् स्यंदः इषदर्थे द
रे व्यपमि॥ अमरः अर्थेदे शोणं चलमिति च॥ कीलितमिति कीलप्रलिष्टेतो। प्रातःकाले राधायाः सुरत वि

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मद्विरहेण वेह नु तावेन माधवस्य मनः कीदृशं तन्मनः सूद्दिति सौवः ॥७॥ ग्राम प्राप्य मयि स्वयंवरा हीरे दती रे दे ॥ ३ं
के सुंदरि कालकूटमपि वरमूढो मृडाणीपतिः हन्त सर्वकथा लिखनमुपमनसो विलिप्यकमो चलराधया स्त
नकोरकोपरि विलसन्नेत्रो हरिर्विवशः ॥५॥ हरिः कोपुष्णानु अवशं रहेतु । इति श्लोकार्जनाकवि रत्निषय
ति । कीदृशो हरिः स्वाधया स्तनकोरकोपरि स्तनौ कुचौ कोमलत्वादिना गुणेन सदृशौ कोरका विवशयोरुपरि
विलसती संवृद्धे लोचने यस्य स तथा मां चल हृदय ग्राम देश लग्ना चले विक्षिप्य दूरा त्वा कीदृश्या: इत्थमनेन स
कारेण पूर्वकथा लिखनमुपमनसः कथं दर्श विज्ञेया: इत्यर्थः । श्लि मिलादि हे सुंदरि ग्राम प्राप्य मृडाणीप
तिः हीरे दती रे हारे स्मार्याती रमध्ये कालकूटं विषमपि वदति तिरोके उपसेदे । अतएव मूढा ज्ञानं दुर्बल:
चाकीदृशी ॥ मयि मद्विषये स्वयंवरपरं मर्दकपूत्तिकामित्यर्थः मृडाणी गौरी तत्स्याः पतिस्तेन गौरीपतिवेपितवा
ला सा द्विषम पिवदिति गौर्या अपि चं स्मरणेति भाव: ॥७॥ व्यालोलः केशपाशस्तरलितमलकैः स्वेदलोलौ कपोलौ
स्पष्टा दष्टाधरश्रीः कुचकलशरुचा हारिता हारयष्टिः । काञ्चीकाञ्चीद् गतासां स्तनजघनपदं पाणिनाच्छाद्य सद्यः
पश्यन्ती चात्मरूपं तदपि विलुलितस्रग्धरेयं धिनोति ॥८॥ इयं राधा तदपि धुनोति । कीदृशी आत्मरूपं नि
जरूपं पश्यन्ती । पुनः कीदृशी विलुलिता इतः ततः प्रापि कमालाकेशस्य विलुलिता स्रग्धरा । कें

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

चास्तन ऊघ्नयोः पदमासोगतस्तेनपाणिनाहस्तेन सघस्तत्द्रुपाएवाछाद्यतिचे धायनदपीतिकतः केशपाश
यत्रास्तकेशोव्यालोलवंचलोत्तद्द॥ अलकैश्चूर्णकुंतलैस्तारलितंस्थानाच्चलितं॥ यद्यातरलितंहसितंयस्य
स्यात्तथाकपोलौघूर्मितलेनवंचलावत्तौ। अधरश्रीः उत्पलदलस्पष्टाअव्यक्ताद्दष्टादंतखंडिताहार
यष्टिमुक्ताकलापः कुचकलशरुचास्तनद्युटीत्याहारितादूरंसताकांचीक्षुद्रघंटिकाकंपिताश्रोणि
गर्ताचलितायस्मात्हिसर्वत्रयोज्यंतस्मादित्यत्तिधानात्यच्चदोर्नित्यस्तबंधव्यात्सग्धरेत्यानिधानादत्त
मपिसूचितं अत्रध्वनोति लीलार्थः।८॥ ईषन्मीलितनेत्रमुग्धहसितंसीत्कारधाराविशाव्यक्तव्योकुल
केलिकोकुविकचाहंसासुधीतधरं आस्तेचिपिपयोधरे परिपरिरंभंगाकुरंगीदृशोहर्षोत्कर्षविमुक्त
निःसहतनोर्न्यापिबत्याननं॥७॥ कुरंगीदृशोहरिणनयनायाः आननंमुखंधन्यो भाग्यवानजनोधयति
पिबति। कीदृश्याः हर्षस्योत्कर्ष आधिक्यंतेन विमुक्तापरित्यक्ता अत एव निःसहाकार्शंक्षमा तनुःशरीरंय
स्याः आननंकीदृशं। ईषन्मीलितंनेत्रंमनागमुकुलितंनयनेमुग्धंसुंदरंहसितंहास्यंयत्रयत्रयथास्तुनःकीदृ
शं। सीत्कारस्यकामविलासविशेषस्यप्रधारापरंपरातद्दशातदायच्चसावलोव्यक्ताआकुलतयाकेलिःक्री ७७
डातयाव्याकुलःशोकादिधूनिस्तेनविकशांतोदीप्यमानोयेदंतास्तेषांमंशुभिःकिरणैःश्वेतःपाटलि

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तोधृतोयत्र तत्तथा हेतुमाह॥ स्यासे मा हि॥ मृसेनेति॥ स्यासपदनेन उ तद्धे किं सिद्धलाना न्विनो योपयो धृतैतयोरूप दिक्
द्भूतागस्यपरिष्ठंगा द्राक्षेषा लतनकलश मापी अग्रआलिंग्य धत्तो धरं पिबंती तितावः॥ काकुस्त्रियां विकारोयः शोकभीत्या
दिभिः ध्वनिः इत्यमरः॥ निन्न; कंठध्वनिर्धीरैः काकुरित्यभिधीयते॥ इति विश्वः॥ ७॥ अथ साभिगता बाधस्य धा स्वाधीन
भर्तृका॥ निजगाद इग तिक्रांतं कांतमंडनवांछया॥ ८॥ अथानंतरं कांतं प्रियं राधा निजगाद॥ कीदृशं॥ रते सुरते क्लांतं
परिश्रांतमपि॥ किमर्थं जगादेत्यत आह मंडनवांछया प्रिकर्तृको लंकरणवांछये त्यर्थः॥ राधा कीदृशी निर्गता आबाधा
ले चे ति: पीडा बाधा पीडा बाधा ध्रुवरुच्यत इति विश्वः॥ यद्वा निर्गता आ समंता द्भावेन बाधा कामपीडा यस्याः स्वात
थाप्युमः की दृशी स्वाधीनभर्तृका सुखेन आधीनः अयत्नो तत्तोपि प्रियो यस्याः सा तथा॥ ७॥ ष्ट्रएंकय इतेने
ष्ट्रलएंचरण पाति ते॥ वक्ष्ये के नैवक्कांतेन कीते स्वाधीनभर्तृका॥ इति सरले। नदेकी तेना हा। गीत स्यास्य रामक
लाभरण:॥॥ ललितालः॥ निजगाद सा यदुनंदने। विहरति हृदयानंदने। यदुनंदने लक्ष्मीविहरति सति। सा राधा निज
गाव क्रकवती कीदृशे हृदयानंदने हृदये स्वचित्तहर्षजनके किं जगादेत्यत आह॥ ७॥ कुरु यदुनंदन चंदनशिशिरतरेण करेण
दृयोधरे। मृगमदपत्रकमत्र मनोभव मंगलकलशसहोदरे॥ हे यदुनंदन मम पयोधरे करेण हस्तेन मृगमदस्य कस्तू
रिकायाः पत्रकं तिलकं पत्रावलीं कुरु॥ करेण कीदृशेन चंदनवत् शिशिरतरेण निशीतलेन। कीदृशे पयोध

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

रा। मनोत्तवस्य कामस्य मंगलार्थं कलशः पूर्णकुंभः तस्य सहोदरे तुल्ये अत्र मंगलकलश इव नरस्य हर्षितो धूलितायत्र
मंगले हिरण्यपंतस्य कलशः मंगलो स्तन इत्युक्ते स्याः मंगले हेमहारकमिति विश्वः॥ केचित्तु चंदनछिद्धारितस्तो
त्यादिं चंदनेन छिद्धारते प्येवं देहि॥ मृगनाभिर्मृगमदो गंधसेखइत्यपि हारावली॥७॥ अलिककुलगंजनमंज
नकं रतिनायकसायकमोचने। चंदधरसुधुबनलंबितकुंडलमुद्रवलयप्रियलोचने॥ हे प्रियलोचने
त्रैश्चयीन्मम चंदधरं सुधुबनेन लंबितमधः स्रस्तं चलकुंडलं चेति विशेषणसमासः तं कुंडलमुद्रवलयाकुंचित
लं लंबितकुंडलमिति पाठः तत्र चंदधरसुबनेन लंबितं प्रदायकुंडलं तद्वत्तलय। द्वीपंय। कीदृशं कुंडलं अलि
कुलं सस्य तस्य मरस्यमूह स्य गंजनमस्ति तयः गंजयतीति गंजनकं॥ भ्रमरसमूहमस्ति रत्नकामस्तिस्मरस्यः लो
वनेको दृशीरतिनश्चिकस्य कामस्य शराः पिकमोचनबाणप्रेत्तेन इवैयिहवा रतिनायका समोचनं हृष्णोयस्मा सा
ता। नयनं कज्जलरंजितं विकामास्याकामोबाणानुसुचंतीति भावः। क्वचित् अलिककुलगंजनरवंजनमिति
पाठः तत्र अलिककुलं गंजयतीति गंजनकं स्रवत्वाः गंजनकः खंजरीटकः। नयनकज्जलेन समरुद्रूपकं केचित्तु
अलिककुलगंजनमंजनोऽकं ड लिपाव॥ हे अलिककुलगंजनमंजनं लोचने नेत्रं कुलयमज्ञौ कुंकुं। अद्यपदे अनेनेति
अंजने अंजनी इति ख्या। तं लंबितकुंडलयोकलये पत्रं धसंख्यः॥ रवीअसी रसनुरवंबर्मदृतिहारावली तस्य ७२

Dr. Urmila Sharma Collection, Varanasi

व्ययः॥ नयनकुरंगतरंगविलासनिराशकेश्रुतिमंडले। मनसिजपाशविलासधरेसुजनेवेषयंनिवेशयमंगलो॥ ३॥ हेजन
वेषरुचिरवेषजनहेनयनकुरंगस्यमृगस्यतरंगविलासउत्फालगमनंतस्यतस्यनिरासोनिषेधस्तंकरोतीतितस्मिन्दृशु
तिमंडलेकर्णमंडलेचेति। तत्रकुंडलेनिवेशय॥ अरेपय। कीदृशेश्रुतिमंडले। मनसिजस्यकामस्यपाशविलासंधरे
तितस्मिन्। पाशः पाशगमननिरोधीतवत्येहिविभावः धरइतिधरेस्वत्रधरएपचाद्यच्॥ ३॥ भ्रमरस्वयंस्वयंनसु
परिष्कुरिरसुरुचिरमममृत्युखे। जितकमलेविमलेपरिकर्मयनर्मजनकमलकंमुखे॥ ४॥ ममसुखेवयदनेअलं
कंपरिकर्मयमंडयशापय। कर्मयाधनंतकरोतीतिणिच्। परिकर्मयेत्रसाधुः कीदृशेमुखेजितंकमलंनयनतया
दृशे। विमलेशुद्धे। अलकंकीदृशं। नर्मजनकंक्रीडाकारकं। कीदृशमलकं ममस्तनमुखेउपरिभ्रमरचयंत्यंगदृशु
रुचिरमितिकालंबहुकालंपारचयतंकारयं। स्वजातीयबुद्ध्याभ्रमरास्तवरपतंतीतिभावः। नमिएविकुरालकनाहि
दृष्ट्वायैवेति। उपरिललाटेसंमुखेभ्रमरचयंरचय। अयेतस्मिन्नत्रविसंधेअनुप्रासंगएवसंविधेनकारस्यतद्वस्था
नसंधेतयोः सकूरमित्यननानुस्वारपूर्वःसकारःस्यातथासतिद्वित्वःपामस्यानावएव। तस्मादेकस्मिन्नूपावेअर्द्धद्वयं
नघटते॥ नच्चवराग्नितिपरत्वेदेकारेयामपरांतः येनानुस्वारस्यत्यर्थद्वयंस्यात्। नचवक्तव्यंस्वयंतमितिसमस्तपदेषिव
र्गोवर्गीतिइत्यनेनानुस्वारस्यनकारोक्तेमत्यस्मात्नव्याख्यातुकूलएवपाठोभवति। भिन्नेपदेअसतिप्राप्तसंबंधेनकारस्य

गी०गो० प्रणमन्नाचावात्ऽउद्धारवैसादृश्यं॥ हे चंद्रलमलकं परिकर्म्मय प्रसाधय॥ शेषं पूर्ववदेव॥८॥ मृगमदरसवलितं कुरु
टी०उ० तिलकमलिकरजनीकरे विहितकलंककलंकमलाननविश्रमितश्रमशीकरे॥५॥ हे कमलाननपद्ममुख अलिकरजनी
७२ करे ललाटचंद्रे तिलकं कुरु। कीदृशं तिलकं मृगमदस्य कस्तूरिकायाः रसेन वलितं संबद्धं गौडे तिलकमित्यर्थः॥ वलि
तं मनोज्ञं पतः कस्तूरीतिलकमत एव श्यामतया विहिता कलंककला षोडशी नागोयत्र॥ एतेन द्वितीया चंद्रा इतिध्व
यः॥ तिलं कर्वं शाय:॥ किंभूते विश्रमिता श्रांतश्रमशीकराः॥ घर्म्मशीकराः प्रयासजबिंदवो यत्र॥ तस्मिन् श्र
तः श्रमजलीकरणं चंद्रोपि लांछनं न छविदृश्य तद्दृश्य तावः के चित् अलकरजनीकरे मिथ्या चंद्रे तिलकं कुरु अल
कशब्दो हृदयमध्ये व्याप्नोति वदंति। तन्न॥ अलिकशब्दस्य मिथ्यावाचिनो मध्ये ऽन्यस्यादर्शनात्॥ अकविप्रयो
गदर्शनमंतरेण कल्पनेति प्रसंगात्॥ ललाटमलिके गोधिरित्यमरः॥६॥ घनरुचिरे चिकुरे कुरु मानदमान
सिज धुज चामरे॥ रतिगलिते ललिते कुसुमानि शिखंडिशिखंडकडामरे॥६॥ हे मानदमानखंडक यत्रालि
ह्लोत्पत्तिदायका चिकुरे केशे कुसुमानि कुरु। कीदृशे चिकुरे मनसिजस्य कामस्य ध्वजचामरे चामरं
रूपे। कीदृशे रतिविगलिते सुरतविदीर्णे ललिते मनोहरे॥ शिखंडिशिखंडकडामरे। शिखंडी ७२

CC0. In Public Domain, Digitizagtion by eGangotri

मयूरः तस्य शिखंडः पिच्छः तेन तः स्वार्थे कन् ततः डामरः अलंकारो यत्र॥ मानंददासीति मानदः दरालेवा॥ कचिदत्र शि
खंडिविखंडकडामरेत्यपि पाठः॥ तत्र शिखंडिनं विखंडते इत्यर्थे कप्रत्ययः। स चासौ डामरो बालक इति डामरो बाल
कस्तोल्पे इति विश्वः॥७॥ सरसघनेजघने मम शंबरदारुणकंदरे॥ मणिरसनावसनाभरणानि शुभाशय
वासय सुंदरे॥७॥ हे शुभाशय स्नेहहृदय मम सुंदरे मोहने स्त्रीकटिकायां रसनावसनं मणियुक्तं रसना सरणानि
वासय परिधापय। कीदृशे सरसजघने रसेन सह वर्तमान इति सरसः स चासौ घनो निविडश्चेति तस्मिन्। पुनः कीदृशे शंबरस्य
सुरविशेषस्य दारुणो नाशकः कामः स एव वारणो हस्ती तस्य कंदरे गह्वरे। हस्ती गिरिकंदरे तिष्ठति स्म ते तथैव
पि कामः तत्रैव संगतो वसतीति रूपकं॥८॥ श्रीजयदेववचसि जयदेवे हृदयं सदयं कुरु मंडने॥ हरिचरणस्मृ
तिसहस्रकलिकलुषज्वरखंडने॥८॥ श्रीजयदेवस्य वचसि हृदयं सदयं विकुरु कुरु॥ कीदृशे जयदेवेंदीवतीति
पदः इत्याति नुपसर्गकः पुनः कीदृशे हरिचरणयोः स्मरणामृतेन कृतं कलिकलुषस्य पापतापस्य ज्वरखंडनं खंड
नमयेन। पापज्वरनाशक इत्यर्थः॥ अत एव मंडने अलंकरणे नूतने विविधनामभूपननागपदकंदर्प। यथोज
नाद्भवनमलंकरणमिति भावः। बारवयक्रमयोश्चित्रपत्रकेरणकपोललोलाः जघनेकांचीमंचय सूजाकवरी
स्थिसरं कलयवलयपाणौ पादे तत्पुंकरुरपुरा विति निगदति प्रातः पीतांबरः प्रियाकरोत॥ ॥ हे मोधवजयजय।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

गी०उ०

७३ मम कुचयोः। स्तनयोः चित्रं नानाप्रकारं करेण रचय॥ स्वकरेणैव रतिशास्त्र [illegible] चनार्थी कपोलयोर्गंडयोः
पत्रं पत्रावलीं रचय। जघने कांचीं घटयस्व। पुष्पमालया कबरीं सुस्थिरां [illegible] या चिकुरं [illegible] या। पाणौ द
स्तवलय॥ श्रेणीकटकमालां कलय आरोपय। आरोपय। तथा तेनैव प्रकारेण मम पादयोः नूपुरौ रचय
इत्यनेन प्रकारेण प्रियया इतः उक्तः अतएव पीत आमोदवान्॥ पीतांबरो हरिः तथा चकार [illegible] हत
वान्। गीतोक्त जघनाद्यलंकरणमिह विरुक्तिमावहति हर्षोत्कर्षेण वसंकथनात्। अन्यथा पुनः हरिणा [illegible]
पुनरुक्तिप्रसंगादिति [illegible]। अचेतं वगेति क्षेपणयोः [illegible] मेति सर्वत्राकांक्षा वशाद् चेति पर्यंकान्वेत्या
दि॥२४॥ पर्यंकीकृतनागनायकफणश्रेणी मणीगणे संक्रांतः प्रतिबिंबसंकलनया बिभ्रद्वपुर्विक्रियाः॥
पादांभोरुहधारि वारिधिसुतामक्ष्णां दिदृक्षुः शतैः कायव्यूहमिवाचरन्नुपचितानादो हरिः पातु वः। श्रीह
रिः कृष्णो वः युष्मान् पातु रक्षतु। कीदृशः सर्वदिक्षु यां वितन्वन् धारयन्न्(?) कयाहेतुभूतया पर्यंकीकृतस्य शेष
स्य नागनायकस्य फणश्रेणी फणानां मणीनां गणे समूहे संक्रांतः संबद्धो यः प्रतिबिंबप्रति
फलनं तेन संकलनया। अत एव। कायव्यूहमिवाचरन् बहुशरीरत्वमिव कुर्वन् पादांभोरुह धारिवारिधि
सुताः अल्पं लानुरागार्थं॥ कमलावी [illegible] शतैः दिदृक्षुः द्रष्टुमिच्छुः॥ अत एवोपचितः॥ हतसमृद्धकामसं
[illegible] नसेवंतीति। तदर्थं कामकेलिं हन्नेवाक्षि सहस्रैरेव मिमित्त॥ ७३

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पाण्डुलिपिः समाप्ता

MANUSCRIPT ENDS

ختم شد

Dr. Urmila Sharma Collection. Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

Dr. Urmila Sharma Collection, Varanasi